||श्रीः||

# श्रीसुरसरस्वतीसभा

शृङ्गेरी

# तृतीया

# संस्कृतभाषादीपिका - ३

This content is same as in the website

[E-Learning portal for Truteeya - the third examination in the Simple Samskrit Examination series.]

Samskrita Bhasha Deepika-III

Developed by: Vyoma Linguistic Labs Foundation

www.vyomalabs.com

# भाषादीपिका

# १.स्तोत्राणि

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत –

**(१) गणेशं के कदा नमस्कुर्वन्ति ?**

वागीशाद्याः सुमनसः सर्वकार्याणाम् आरम्भकाले गणेशं नमस्कुर्वन्ति ।

**(२) वाग्देवता स्वहस्तेषु किं किं धारयति ?**

वाग्देवता स्वहस्तेषु स्फटिकमणिमयीम् अक्षमालां, सितं पद्मं, शुकं, पुस्तकं च धारयति ।

**(३) विष्णोराकारः कीदृशः ? सः कैर्ध्यानगम्यः ?**

विष्णुः शान्ताकारः, भुजगशयनः, पद्मनाभः, सुरेशः, विश्वाधारः, गगनसदृशः, मेघवर्णः, शुभाङ्गः, लक्ष्मीकान्तः, कमलनयनः, भवभयहरः, सर्वलोकैकनाथः च । सः योगिभिः ध्यानगम्यः ।

**(४) कीदृशाय शम्भवे नतिः ?**

आद्याय, अमिततेजसे, श्रुतिपदैर्वेद्याय साध्याय, विद्यानन्दमयात्मने, त्रिजगतः संरक्षणोद्योगिने, अखिलयोगिभिः ध्येयाय, सुरगणैः गेयाय, मायाविने, सम्यक्ताण्डवसम्भ्रमाय, जटिने, शम्भवे नतिः ।

### 2. एतात् विभज्य सन्धिनाम लिखत –

1. हस्तेनैकेन – हस्तेन + एकेन = वृद्धिसन्धिः ।
2. देवतेयं = देवता + इयं = गुणसन्धिः ।
3. भासमानासमाना = भासमाना + असमाना = सवर्णदीर्घसन्धिः ।
4. लोकैकनाथम् = लोक + एकनाथम् = वृद्धिसन्धिः ।
5. संरक्षणोद्योगिने = संरक्षण + उद्योगिने = गुणसन्धिः ।
6. सेयम् = सा + इयं = गुणसन्धि

### 3. पर्यायपदानि लिखत –

1. सुमनाः = देवः, सुरः
2. गजाननः = विघ्नेश्वरः, गणपतिः
3. वदनम् = मुखम्, आननम्
4. सितः = शुक्लः, श्वेतः
5. विष्णुः = नारायणः, केशवः
6. शम्भुः = शिवः, ईशः

7. भुजगः = सर्पः, अहिः

## 4. विरुद्धपदानि लिखत –

1. सुराः x असुराः
2. शुभम् x अशुभम्
3. आद्याय x अन्त्याय
4. सदा x एकदा
5. उपक्रमः x उपसंहारः

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2.पाठे स्थितानाम् सकारान्त- नकारान्त- पुंल्लिङ्ग- शब्दानां चयनं कृत्वा रुपाणां च अभ्यासं कुरुत ।

3.पाठे स्थितानां नूतनक्रियापदरूपाणाम् अभ्यासं कुरुत ।

4.पाठे स्थितानाम् अव्ययानां चयनं कृत्वा वाक्ये योजयत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१.ईशः – पशुपतिः, शम्भुः, शूली, वामदेवः, भूतेशः

शम्भुरीशः पशुपतिः शिवशूली महेश्वरः ।
ईश्वरश्शर्व ईशान्यश्शङ्करश्चन्द्रशेखरः ॥
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ (अमरः)

२.गजाननः – विनायकः, विघ्नराजः, द्वैमातुरः, गणाधिपः, एकदन्तः

विनायको विघ्नराजद्वैमातुरगणाधिपाः ।
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ॥ (अमरः)

३.वदनम् – तुण्डम्, आननम्, मुखम्

वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् । (अमरः)

४.मेघः – वारिवाहः, बलाहकः, धाराधरः, वारिदः, घनः

अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहकः ।
धाराधरो जलधरस्तटित्वान्वारिदोऽम्बुभृत् ॥
घनजीमूतमुदिरजलमुग्धूमयोनयः । (अमरः)

५.सितः – शुक्लः, शुभ्रः, धवलः

शुक्लशुभ्रशुचिश्वेतविशदश्श्येतपाण्डराः ।
अवदातस्सितो गौरो वलक्षो धवलोर्जुनः ॥ (अमरः)

६.सुमनाः – सुरः, अमरः, त्रिदशः

अमरा निर्जरा देवाः त्रिदशा विबुधास्सुराः ।

सुवर्वाणस्सुमनसस्त्रिदिवेशा दिवौकशः ॥
आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥
बर्हिर्मुखा क्रतुभुजो गीर्वाणा दानवरयः ।
वृन्दारका दैअवतानि पुंसि वा देवताः स्त्रियाम् ॥(अमरः)

## २. सर्ववचनेषु रूपाणि लिखत –

१.वाक् – वाचौ, वाचः

२.इयम् – इमे, इमाः

३.विष्णुं – विष्णू, विष्णून्

## ३. समूहेतरपदं चिनुत –

१.पद्मनाभम्, मेघवर्णम्, गजाननम्, कमलनयनम्
२.जपमालाम्, कमलम्, शुकम्, हस्तम्, ग्रन्थम्
३.श्रुतिपदैः, शम्भवे, सुरगणैः, अखिलयोगिभिः
४.नतिः, ज्ञातुं, प्राप्तुं, वक्तुं

## ४. कृत्प्रत्ययस्य नाम लिखत –

१.नत्वा – क्त्वाप्रत्ययः

२.दधाना – शानच्प्रत्ययः

३.नतिः – क्तिन्प्रत्ययः

## ५. शब्दस्वरूपं निर्दिशत –

| **रूपम्** | **अन्तः** | **लिङ्गम्** | **प्रातिपदिकम्** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|---|---|
| सुमनसः | सकारान्तः | पुल्लिङ्गः | सुमनस् | प्रथमा | बहु० |
| भासा | सकारान्तः | स्त्रीलिङ्गः | भास् | तृतीया | एक० |
| वदने | अकारान्तः | नपुंसकलिङ्गः | वदन | सप्तमी | एक० |
| चतुर्भिः | रेफान्तः | पुल्लिङ्गः | चतुर् | तृतीया | नित्यबहु० |
| नतिः | इकारान्तः | स्त्रीलिङ्गः | नति | प्रथमा | एक० |
| दोर्भिः | सकारन्तः | पुल्लिङ्गः | दोस् | तृतीया | बहु० |
| योगिभिः | नकारान्तः | पुल्लिङ्गः | योगिन् | तृतीया | बहु० |
| जटिने | नकारान्तः | पुल्लिङ्गः | जटिन् | चतुर्थी | एक० |

# २.कालिदासः

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत –

**(१) कालिदासः कस्य सभायामासीत् ?**
कालिदासः भोजभूपालस्य सभायामासीत् ।

**(२) भोजस्य कस्मिन् महानादर आसीत् ?**
भोजस्य कालिदासे महानादर आसीत् ।

**(३) भोजेन किं कृतम् ?**
भोजेन 'क, ख, ग, घ' इत्येषा समस्या दत्ता ।

**(४) बालिकायाः हस्ते किमासीत् ?**
बालिकायाः हस्ते तालीपत्रमयं पुस्तकम् आसीत् ।

**(५) केन समस्या पूरिता ?**
कालिदासेन समस्या पूरिता ।

### 2. विभज्य सन्धिनाम लिखत –

1. खल्विमाम् – खलु + इमाम् = यण्सन्धिः ।
2. सर्वेऽपि – सर्वे + अपि = पूर्वरूपसन्धिः ।
3. नैकोऽपि = न + एको + अपि = वृद्धिसन्धिः + पूर्वरूपसन्धिः ।
4. प्राह = प्र + आह = सवर्णदीर्घसन्धिः ।
5. चक्रवर्तीति = चक्रवर्ती + इति = सवर्णदीर्घसन्धिः ।

### 3. सर्वपुरुषवचनेषु लिखत –

अमन्यत –**'मन ज्ञाने'** - लङ्लकार – आत्मनेपदि - रूपाणि, प्रथमपुरुषः, एकवचनम् ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | अमन्यत | अमन्येताम् | अमन्यन्त |
| **मध्यम-पुरुषः** | अमन्यथाः | अमन्येथाम् | अमन्यध्वम् |
| **उत्तम-पुरुषः** | अमन्ये | अमन्यावहि | अमन्यामहि |

पठ्यताम् –**'पठ व्यक्तायां वाचि'** – धातुः, कर्मणि प्रयोगः – लोट्लकार – आत्मनेपदि - रूपाणि, प्रथमपुरुषः, एकवचनम् ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | पठ्यताम् | पठ्येताम् | पठ्यन्ताम् |
| **मध्यम-पुरुषः** | पठ्यस्व | पठ्येथाम् | पठ्यध्वम् |
| **उत्तम-पुरुषः** | पठ्यै | पठ्यावहै | पठ्यामहै |

अपृच्छत् –**'प्रच्छ ज्ञीप्सायाम्'**- धातुः लङ्लकारः - परस्मैपदि - रूपाणि, प्रथमपुरुषः, एकवचनम्

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | अपृच्छत् | अपृच्छताम् | अपृच्छन् |
| **मध्यम-पुरुषः** | अपृच्छः | अपृच्छतम् | अपृच्छत |
| **उत्तम-पुरुषः** | अपृच्छम् | अपृच्छाव | अपृच्छाम |

अभूत् –**'भू सत्तायाम्'** - लुङ्लकारः, परस्मैपदि - रूपाणि, प्रथमपुरुषः, एकवचनम् ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | अभूत् | अभूताम् | अभूवन् |
| **मध्यम-पुरुषः** | अभूः | अभूतम् | अभूत |
| **उत्तम-पुरुषः** | अभूवम् | अभूव | अभूम |

4. एभिः पदैः वाक्यानि रचयत –

1. **एत्य** – गृहम् एत्य अहं देवं नमामि ।
2. **श्रुतः** – कैकेय्याः आदेशः रामेण श्रुतः ।
3. **एव** – तेनालिराम एव विकटकविः ।
4. **अमन्यत** – सीता रावणं तृणम् अमन्यत ।
5. **समस्या –** मया समस्या पूरिता ।

# क्रियापदानां रूपाणि

**'शीङ्' स्वप्ने** धातोः– लङ्लकारः- आत्मनेपदि-रूपाणि।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | अशेत | अशयाताम् | अशेरत |
| **मध्यम-पुरुषः** | अशेथाः | अशयाथाम् | अशेध्वम् |
| **उत्तम-पुरुषः** | अशयि | अशेवहि | अशेमहि |

**'ब्रूञ्' व्यक्तायां वाचि**धातोः– लङ् लकारः, परस्मैपदि-रूपाणि ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | अब्रवीत् | अब्रूताम् | अब्रुवन् |
| **मध्यम-पुरुषः** | अब्रवीः | अब्रूतम् | अब्रूत |
| **उत्तम-पुरुषः** | अब्रवम् | अब्रूव | अब्रूम |

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2.पाठे स्थितानां क्रियारूपाणाम् चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

3.पाठे स्थितानाम् कृदन्त - अव्ययानां चयनं कृत्वा वाक्ये योजयत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१.वृत्तान्तः – वार्ता, प्रवृत्तिः, उदन्तः

वार्ता प्रवृत्तिर्वृत्तान्तः उदन्तः स्यात् (अमरः)

२.साकं – सार्धम्, समम्, सह

**२. विरुद्धार्थकपदानि लिखत –**

१.आदरः - अनादरः

२.असहमानाः - सहमानाः

३.परोक्षम् - प्रत्यक्षम्

४.प्रीतः – अप्रीतः

**३. वाक्यदोषं परिहरत –**

१.कालिदासः स्वप्रतिभेन सर्वानन्यान् कवीन् अत्यशेत ।

कालिदासः स्वप्रतिभया सर्वानन्यान् कवीन् अत्यशेत ।

२.इदं वृत्तान्तः कथञ्चित् भोजेन श्रुतः ।

अयं वृत्तान्तः कथञ्चित् भोजेन श्रुतः ।

३.सा च तां कविः दृष्ट्वा प्राणमत् ।

सा च तं कविं दृष्ट्वा प्राणमत् ।

४.राजन्, पूरितः मया समस्या ।

राजन्, पूरिता मया समस्या ।

**४. प्रश्नवाक्यानि लिखत –**

१.कालिदासः बालिकामपश्यत् ।

कालिदासः कामपश्यत्?

२.ते राजसभामागत्य म्लानमुखा अतिष्ठन् ।

ते राजसभामागत्य कथम् अतिष्ठन्?

३.भोजराजस्य कालिदासे महानादरः ।

कस्य कालिदासे महानादरः?

४.यः समस्यां पूरयति सः कवीनां चक्रवर्तीति परिगण्यते ।

यः समस्यां पूरयति सः किमिति परिगण्यते?

**५. इतरवचनानि लिखत ।**

१.सभायाम् – सभयोः, सभासु

२.सर्वान् – सर्वं, सर्वौ

३.तस्मिन् – तयोः, तेषु

४.हस्तेन – हस्ताभ्यां, हस्तैः

५.समस्या – समस्ये, समस्याः

# ३.विक्रमस्यौदार्यम्

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत –

**(१) योगी उज्जयिनीं कदा आगच्छत् ?**

विक्रमार्के विश्वम्भरां पालयति योगी उज्जयिनीं प्रत्यागच्छत् ।

**(२) विक्रमः योगिनमाह्वातुं कं प्रेषयामास ?**

विक्रमः योगिनमाह्वातुं पुरोहितं त्रिविक्रमं प्रेषयामास ।

**(३) गोप्यानि कानि ?**

आयुः, वित्तं, गृहच्छिद्रं, मन्त्रं, औषधं, सङ्गमः, दानम्, मानम्, अवमानः एतानि नव गोप्यानि ।

**(४) अचक्षुषां चक्षुः कः ?**

अचक्षुषां चक्षुः राजा ।

**(५) विक्रमः फलं कस्मै प्रायच्छत् ?**

विक्रमः फलं कुष्ठव्याधिपरिपीडिताय विप्राय प्रायच्छत् ।

### 2. ससन्दर्भं विवृणुत –

**(१) स च वेदवेदाङ्गवित् ।**

कः पाठः ? विक्रमस्यौदार्यम् इति पाठः ।
कः अवदत् ? लेखकः अवदत् ।
कं प्रति अवदत् ? पाठकान् प्रति अवदत् ।
कदा अवदत् ? उज्जयिनीं प्रति आगतस्य योगिनः महिमानं वर्णयन् लेखकः एवम् अवदत् ।

**(२) शयीमहि महीपृष्ठे ।**

कः पाठः ? विक्रमस्यौदार्यम् इति पाठः ।
कः अवदत् ? योगी अवदत् ।
कं प्रति अवदत् ? पुरोहितं त्रिविक्रमं प्रति अवदत् ।
कदा अवदत् ? यदा पुरोहितः त्रिविक्रमः योगिनं राजदर्शनाय आह्वयति स्म तदा योगी एतत् वाक्यम् अवदत् ।

**(३) नीतिविदा पुरुषेण स्वस्यायुर्न कथनीयम् ।**

कः पाठः ? विक्रमस्यौदार्यम् इति पाठः ।
कः अवदत् ? योगी अवदत् ।
कं प्रति अवदत् ? राजानं प्रति अवदत् ।
कदा अवदत् ? यदा राजा योगिनः आयुः अपृच्छत् तदा योगी एतत् अवदत् ।

**(४) राजा चार्तिहरो गुरुः ।**

कः पाठः ? विक्रमस्यौदार्यम् इति पाठः ।
कः अवदत् ? कुष्ठव्याधिपरिपीडितः विप्रः अवदत् ।
कं प्रति अवदत् ? राजानं प्रति अवदत् ।
कदा अवदत् ? यदा राजा विक्रमः पुरं प्रविश्य राजमार्गे गच्छन्नासीत् तदा सः एवं अवदत् ।

**(५) जरारोगवर्जितो वज्रकायो भविष्यसि ।**

कः पाठः ? विक्रमस्यौदार्यम् इति पाठः ।
कः अवदत् ? योगी अवदत् ।
कं प्रति अवदत् ? राजानं प्रति अवदत् ।
कदा अवदत् ? योगी मन्त्रस्य फलम् एवम् अवदत् ।

## 3. सुबन्तं, तिङन्तं, अव्ययञ्च पृथक् कुरुत –

| सुबन्तम् | तिङन्तम् | अव्ययम् |
|---|---|---|
| गच्छन् | प्रत्यागच्छत् | साक्षात् |
| मन्त्रम् | प्राह | कथम् |
| नीतिविदा | | एकदा |
| अहम् | | |

## 4. कर्तृपदं, कर्मपदं, क्रियापदञ्च दर्शयत –

**(१) नीतिविदा स्वस्यायुर्न कथनीयम् ।**

कर्तृपदम् – नीतिविदा
कर्मपदम् – स्वस्यायुः
क्रियापदम् – कथनीयम्

**(२) राजा विक्रमो भवन्तमाह्वयति ।**

कर्तृपदम् – राजा विक्रमः
कर्मपदम् – भवन्तम्
क्रियापदम् – आह्वयति ।

## 5. एभिः पदैः वाक्यानि रचयत –

1. आस्ताम्– रामलक्ष्मणौ नाम बालकौ आस्ताम् ।
2. तर्हि– यदि विद्युत् अस्ति तर्हि दीपः ज्वलति ।
3. उपसृत्य– गुरुम् उपसृत्य शिष्यः नमति ।
4. साधयामि– अहम् अनेकानि कार्याणि साधयामि ।

## 6. व्याकरणविशेषः –

उज्जयिनीं समया –

सूत्रम् – अभितः परितः – समया – निकषा – हा – प्रतियोगेऽपि ।
समीपार्थकस्य 'समया' इत्यव्ययस्य प्रयोगे तत्सम्बद्धं पदं द्वितीयाविभक्तौ भवति । 'उज्जयिन्याः समीपे' इत्यर्थः ।

When the indeclinable 'समया', meaning 'close to' is used in a sentence, the associated word should always be in द्वितीयाविभक्ति।

ಸಮೀಪ ಎಂಬ ಅರ್ಥವುಳ್ಳ 'ಸಮಯಾ' ಎಂಬ ಪದವನ್ನು ವಾಕ್ಯದಲ್ಲಿ ಉಪಯೋಗಿಸಿದಾಗ ಅದಕ್ಕೆ ಸಂಬಂಧಿಸಿದ ಪದವು ದ್ವಿತೀಯಾ ವಿಭಕ್ತಿಯಲ್ಲಿರಬೇಕು.

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1 .अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. पाठे स्थितानां षकारान्त – नपुंसकलिङ्ग - शब्दानां चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

3. पाठे स्थितानां नकारान्त – पुल्लिङ्ग – शब्दानां चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

4. पाठे स्थितानां क्रियारूपाणाम् अभ्यासं कुरुत ।

5. पाठे स्थितानाम् अव्ययानां चयनं कृत्वा वाक्ये योजयत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१.ख्यातिः – प्रथा, प्रख्यातिः
२.निशम्य - श्रुत्वा
३.अन्तिकं - समीपम्
४.वित्तं – स्वापतेयम्, धनम्, रिक्थम्, हिरण्यम्, द्रविणम्
द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥ (अमरः)
५.जरा – विस्रसा
विस्रसा जरा (अमरः)
६.विप्रः – द्विजातिः, अग्रजन्मा, भूदेवः, वाडवः, ब्राह्मणः
द्विजात्यग्रजन्मभूदेववाडवाः । विप्रश्च ब्राह्मणोऽसौ (अमरः)
७.चक्षुः – लोचनम्, नयनम्, नेत्रम्
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।(अमरः)

**२. विरुद्धार्थकपदानि लिखत –**

१.समीपम् - दूरम्
२.गोप्यम् - अगोप्यम्
३.अन्ते - आरम्भे
४.एकम् – अनेकम्

३. **प्रत्ययं निर्दिशत –**

१.आह्वातुम् - तुमुन्प्रत्ययः
२.गत्वा - क्त्वाप्रत्ययः
३.आगत्य - ल्यप्प्रत्ययः
४.कुर्वन् - शतृप्रत्ययः
५.कथनीयम् - अनीयर्प्रत्ययः
६.पूर्णाहुतिः – क्तिन्प्रत्ययः

४. **क्रियापदानां धातु – पद- लकार – पुरुष – वचनानि लिखत -**

| **रूपम्** | **धातुः** | **पदम्** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|---|
| अब्रवीत् | ब्रूञ् | परस्मैपदी | लङ् | प्रथमः | एक० |
| शयीमहि | शीङ् | आत्मनेपदी | लङ् | उत्तमः | बहु० |
| कारयेत् | डुकृञ् + णिच् | परस्मैपदी | वि. लिङ् | प्रथमः | एक० |
| उपदिशामि | उप + दिश् | परस्मैपदी | लट् | प्रथमः | एक० |
| लुप्यते | लुप् | आत्मनेपदी | लट् | प्रथमः | एक० |
| करवाणि | कृञ् | परस्मैपदी | लोट् | उत्तमः | एक० |
| अतुष्यत् | तुष् | परस्मैपदी | लङ् | प्रथमः | एक० |

# ४. आहारशुद्धौ सत्त्वशुद्धिः

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत ।

**(१) शुकदम्पती कुत्र न्यवसताम् ?**
शुकदम्पती विन्ध्यपर्वते कस्मिंश्चित् न्यग्रोधपादपे न्यवसताम् ।

**(२) शुकशावकयोर्नाम किम् ?**
शुकशावकयोर्नाम रामः दुर्मुखः च इति ।

**(३) शावकौ काभ्यां व्यक्रीणात् ?**
व्याधः गोदावर्यास्तीरे कस्मैचित् साधवे शावकमेकं कस्मैचन सौनिकाय अन्यच्च व्यक्रीणात् ।

**(४) रामशुकः कुत्र न्यवसत् ?**
रामशुकः आम्रपादपे न्यवसत् ।

**(५) दुर्मुखः कुत्र न्यवसत् ?**
दुर्मुखः न्यग्रोधपादपे न्यवसत् ।

### 2. ससन्दर्भं विवृणुत –

**(१) तस्य चक्षुषी विदारयत । गलं भित्वा अश्नाम ।**
कः पाठः ? आहारशुद्धौ सत्त्वशुद्धिः इति पाठः ।

कः अवदत् ? दुर्मुखः शुकः अवदत् ।
कं प्रति अवदत् ? अन्यान् पक्षिणः प्रति अवदत् ।
कदा अवदत् ? यदा द्विजः न्यग्रोधपादपस्य छायायां विश्रमितुकाम आगच्छत्, तदा तं दृष्ट्वा दुर्मुखः अन्यान् पक्षिणः प्रति एवम् अवदत् ।

**(२) अतिथिसत्कारः श्रेयस्करः ।**
कः पाठः ? आहारशुद्धौ सत्त्वशुद्धिः इति पाठः ।
कः अवदत् ? रामः शुकः अवदत् ।
कं प्रति अवदत् ? इतरान् विहङ्गमान् प्रति अवदत् ।
कदा अवदत् ?– यदा द्विजः आम्रतरोः समीपम् आगतवान् तदा रामः शुकः इतरान् विहङ्गमान् प्रति एवम् अवदत्|

## 3. अपेक्षितं रूपं लिखत –

१. 'दृश्' धातोः लोट् मध्यमपुरुषः ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **मध्यमपुरुषः** | पश्य, पश्य, पश्यतात् | पश्यतम् | पश्यत |

२. 'स्था' धातोः लट् उत्तमपुरुषः ।

| | | | |
|---|---|---|---|
| **उत्तमपुरुषः** | तिष्ठामि | तिष्ठावः | तिष्ठामः |

३. 'वस्' धातोः तुमुन्नन्तरूपम् - उषितुम् ।

## 4.विभज्य सन्धिनाम लिखत –

1. कस्मिंश्चित्  - कस्मिन् + चित् = अनुस्वारसन्धिः, श्चुत्वसन्धिः
2. तावुभावपि = तौ + उभौ + अपि = यान्तावान्तादेशसन्धिः
3. इत्युच्चैराक्रोशत्  = इति + उच्चैः + आक्रोशत् = यण् सन्धिः + विसर्ग सन्धिः
4. अतस्तस्य = अतः + तस्य = विसर्ग सन्धिः (सकारादेशः)

# क्रियापदम् –

**'अश'** भोजने धातुः- लोट्लकार-परस्मैपदि-रूपाणि ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | अश्नातु/ अश्नीतात् | अश्नीताम् | अश्नन्तु |
| **मध्यम-पुरुषः** | अशान, अश्नीतात् | अश्नीतम् | अश्नीत |
| **उत्तम-पुरुषः** | अश्नानि | अश्नाव | अश्नाम |

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. व्याकरणभागे स्थितयोः श्चुत्व – ष्टुत्वसन्धि - नियमयोः अभ्यासं कुरुत ।

3. पाठे स्थितानां तकातान्त – षकारान्त – नकारान्त - शब्दानां चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

4. पाठे स्थितानां कृत्प्रत्ययान्त – शब्दानां चयनं कुरुत ।

5. पाठे स्थितानां क्रियारूपाणाम् अभ्यासं कुरुत ।

6. पाठे स्थितानाम् अव्ययानां चयनं कृत्वा वाक्ये योजयत ।

7. पाठे विद्यमान – विधिलिङ् – लकार – आत्मनेपदिधातुनां रूपाणाम् अभ्यासं कुरुत ।

**लेखनाभ्यासः –**

**१. पर्यायपदानि लिखत –**

१.व्याधः – मृगवधाजीवः, मृगयुः, लुब्धकः

व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः (अमरः)

२.परुषवचनम् – निष्ठुरवचनम्

३.तरुः – शाखी, विटपी, पादपः, अनोकहः, कुटः, सालः

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनिकहः कुटस्सालः पलाशी द्रुद्रुमागमाः ॥ (अमरः)

५.सत्वरम् – शीघ्रम्

६.विहङ्गमः – खगः, शकुन्तिः, पक्षी, पतत्री, पतगः, नीडोद्भवः, नभसङ्गमः

खगे विहङ्ग विहग विहङ्गम विहायसः ।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥
पतत्रिपत्रपतगपतत्पत्ररथाण्डजाः ।
नगौको वाजिविकिरविविष्किरपतत्रयः ॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः । (अमरः)

७.अभ्यवहरतु – भक्षयतु

८.यमलौ भ्रातरौ – युगलौ भ्रातरौ

९.सद्मनि – गृहे, गेहे, निकेतने, सदने, भवने, आगारे, आलये, आवसथे

गृहं गेहोदवसितं वेश्मसद्मनिकेतनम् ।
निशान्तवस्त्यसदनं भवनागारमन्दिरम् ॥
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ।
धिष्ण्यमोको निवसनं स्थानावसथवास्तु च ।
संस्त्यायमुटजं धाम निवेशश्शरणं क्षयः ॥ (अमरः)

१०.नापैति – न गच्छति

११.वनम् – विपिनम्, काननम्, अरण्यम्

अटव्यरण्यं विपिनं गहनं काननं वनम् । (अमरः)

१२.गङ्गा – जाह्नवी, भागीरथी, त्रिपथगा

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।

भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥ (अमरः)

१३. बुद्धिः – मनीषा, धिषणा, प्रज्ञा

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ॥
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः । (अमरः)

## २. प्रयोगपरिवर्तनं कुरुत –

१.साधुः शावकस्य राम इति नाम अकरोत् ।
साधुना शावकस्य राम इति नाम अक्रियत ।
२.साधुः आगतान् जनान् प्रीणयति स्म ।
साधुना आगताः जनाः प्रीण्यन्ते स्म ।
३.द्विजः विक्रोशरवं श्रुतवान् ।
द्विजेन विक्रोशरवः श्रुतः ।

## ३. कर्तृ-कर्म-क्रियापदानि सूचयत –

१. व्याधः जालं प्रसारयति ।

कर्ता – व्याधः

कर्म – जालम्

क्रियापदम् – प्रसारयति

२. रामः शुकः नीडं विरचय्य न्यवसत् ।

कर्ता – रामः शुकः

कर्म – नीडम्

क्रियापदम् – न्यवसत्

३. त्वं मधुरं रौषि ।

कर्ता – त्वं

कर्म – मधुरं

क्रियापदम् – रौषि

४. दुर्मुखः परुषवचनानि अश्रुणोत् ।

कर्ता – दुर्मुखः

कर्म – परुषवचनानि

क्रियापदम् – अश्रुणोत्

## ४. समूहेतरपदं चिनुत –

श्रावं श्रावं, दर्शं दर्शं, गृहे, दिने दिने
व्याधः, साधुः, विप्रः, दुर्मुखः
गृहीत्वा, आहूय, भित्वा, नीत्वा
निक्षिपत, न्यवसत्, अन्यान्, विदारयत

५. **क्रियापदानां धातु – पद- लकार – पुरुष – वचनानि लिखत –**

| रूपम् | धातुः | पदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| न्यवसताम् | नि + वस् | परस्मैपदी | लङ् | प्रथमः | द्विव० |
| उदडयेताम् | उद् + डीङ् | आत्मनेपदी | लङ् | प्रथमः | द्वि० |
| अश्रुणवम् | श्रु | परस्मैपदी | लङ् | उत्तमः | एक० |
| प्रावदत् | प्र + वद् | परस्मैपदी | लङ् | प्रथमः | एक० |
| उपविशेत् | उप + विश् | परस्मैपदी | वि. लिङ् | प्रथमः | एक० |
| रौषि | रु | परस्मैपदी | लट् | मध्यमः | एक० |
| संस्तृणीत | सम् + स्तृ | आत्मनेपदी | वि. लिङ् | प्रथमः | एक० |

# ५.एकलव्यस्य गुरुभक्तिः

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत –

**(१) द्रोणाचार्यः कः ?**

द्रोणाचार्यः एकः प्रसिद्धः धनुर्वेदाचार्यः ।

**(२) तस्य प्रसिद्धः शिष्यः कः ?**

तस्य प्रसिद्धः शिष्यः अर्जुनः ।

**(३) तस्य प्रसिद्धाः शिष्याः के ?**

तस्य प्रसिद्धाः शिष्याः कौरवपाण्डवाः ।

**(४) एकलव्यः कः ?**

एकलव्यः हिरण्यधनुषो निषादराजस्य पुत्रः ।

**(५) एकलव्यः किमर्थं द्रोणस्य समीपमागच्छत् ?**

एकलव्यः अस्त्राभ्यासार्थं द्रोणस्य समीपमागच्छत् ।

**(६) द्रोणः तस्मै किमुत्तरं प्रायच्छत् ?**

द्रोणः अवदत् – “एकलव्य, त्वं मम शिष्योऽसि, स्वगृहे एव अस्त्रविद्यां शिक्षस्व । शरप्रयोगे बलवत्तरो भविष्यसि” इति ।

### 2. ससन्दर्भं विवृणुत –

**(१) शरप्रयोगे बलवत्तरः भविष्यसि ।**

कः पाठः ? एकलव्यस्य गुरुभक्तिः इति पाठः ।
कः अवदत् ? द्रोणः अवदत् ।
कं प्रति अवदत् ? एकलव्यं प्रति अवदत् ।
कदा अवदत् ? यदा एकलव्यः अस्त्राभ्यासाय द्रोणस्य समीपमागतः, तदा निषादकुमारमेकलव्यं शिक्षयितुम् अनिच्छन् द्रोणः एवम् अवदत् ।

**(२) त्वां लोकोत्तरं धनुर्धरं करिष्यामि ।**

कः पाठः ? एकलव्यस्य गुरुभक्तिः इति पाठः ।
कः अवदत् ? द्रोणः अवदत् ।

कं प्रति अवदत् ? अर्जुनं प्रति अवदत् ।
कदा अवदत् ? गुरुः द्रोणः अर्जुनस्य धनुर्वेदे परमं प्रावीण्यं वीक्ष्य अतितरां प्रीतः एवम् अवदत् ।

**(३) न हि किञ्चित् गुरवे अदेयम् ।**
कः पाठः ? एकलव्यस्य गुरुभक्तिः इति पाठः ।
कः अवदत् ? एकलव्यः अवदत् ।
कं प्रति अवदत् ? द्रोणं प्रति अवदत् ।
कदा अवदत् ? यदा द्रोणः एकलव्यं गुरुदक्षिणाम् अपृच्छत् तदा एकलव्यः एवम् अवदत् ।

## 3. पर्यायपदानि लिखत –

1. कोविदः– पण्डितः, विद्वान्
2. प्रथितः– प्रख्यातः, प्रसिद्धः
3. अन्तिकम् – समीपम्, निकटम्
4. प्रतिकृतिः– प्रतिमा, मूर्तिः
5. सारमेयः– शुनकः, श्वा, कुक्कुरः, भषकः
6. आस्यम्– मुखम्, वदनम्, आननम्

## 4. दोषान् परिहरत –

(१) भवान् गच्छ । - भवान् गच्छतु ।

(२) द्रोणस्य सह अर्जुनः अगच्छत् । - द्रोणेन सह अर्जुनः अगच्छत् ।

(३) ग्रामस्य समया उपवनम् अस्ति । - ग्रामं समया उपवनम् अस्ति ।

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2.व्याकरणभागे स्थितस्य जश्त्वसन्धेः, अनुनासिकसन्धेश्च नियमम् अभ्यस्यत ।

3. पाठे विद्यमानस्य कृञ् धातोः लिट् लकार – लङ् लकार – लृट्लकार परस्मैपदरूपाणां पुरुषत्रये अभ्यासं कुरुत ।

4. पाठे स्थितस्य षकारान्त – नपुंसकलिङ्गशब्दस्य चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

5. पाठे स्थितानाम् अव्ययानां चयनं कृत्वा वाक्ये योजयत ।

6. पाठे स्थितानां विशेषणवाचकपदानां चयनं कुरुत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१.समीक्ष्य - दृष्ट्वा

२.शरः – पृषत्कः, विशिखः, बाणः, खगः, आशुगः, कलम्बः, रोपः

पृषत्कबाणविशिखा अजिह्मगखगाशुगाः ।
कलम्बमार्गणशराः पत्री रोप – इषुर्द्वयोः ॥ (अमरः)

३.मृगया – आच्छोदनम्, मृगव्यम्, आखेटः
आच्छोदनं मृगव्यं स्यादाखेटो मृगया । (अमरः)

४.आयान्तं – आगच्छन्तं

५.उपसङ्गम्य – समीपं गत्वा

६. कण्ठः – गलः

७. पादः – पदः, अङ्घ्रिः, चरणः
पादः पदङ्घ्रिश्चरणोस्त्रियाम् ।(अमरः)

८. शिरः – शीर्षम्, उत्तमाङ्गम्, मस्तकम्
उत्तमाङ्गं शिरश्शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।(अमरः)

**२. विरुद्धार्थकपदानि लिखत –**

१.बहवः - अल्पाः
२.अचिरात् - चिरात्
३.अपरिचितम् - परिचितम्
४.कृतपरिश्रमः - अकृतपरिश्रमः
५.पुरतः - पृष्ठतः
६.अदेयम् - देयम्

**३. सुबन्तं-तिङन्तं-अव्ययञ्च पृथक् कुरुत –**

१.गुरुः अर्जुनस्य प्रावीण्यं वीक्ष्य प्रीतः सन् अवदत् ।
सुबन्तम् – गुरुः, अर्जुनस्य, प्रावीण्यं, प्रीतः
तिङन्तम् – वीक्ष्य, सन्
अव्ययम् - अवदत्

२.कौरवपाण्डवाः मृगयां कर्तुं वनमगच्छन् ।
सुबन्तम् – कौरवपाण्डवाः, मृगयां, वनम्
तिङन्तम् –अगच्छन्
अव्ययम् - कर्तुं

३.स तु द्रोणमवलोक्य शिरसा प्रणम्य अर्घ्यपाद्यादिभिः आराधयामास ।
सुबन्तम् – सः,द्रोणम्, शिरसा, अर्घ्यपाद्यादिभिः
तिङन्तम् – आराधयामास
अव्ययम् – तु, अवलोक्य, प्रणम्य

४.ततः सः पूर्ववत् शरान् मोक्तुमसमर्थः अभवत् ।
सुबन्तम् – सः, शरान्, असमर्थः

तिङन्तम् – अभवत्

अव्ययम् – ततः, पूर्ववत्, मोक्तुम्

**४. सन्धिं विभज्य नाम लिखत –**

१.तत्रागताः = तत्र + आगताः (सवर्णदीर्घसन्धिः)
२.एकलव्योऽपि = एकलव्यः + अपि (विसर्गस्य उकारः)
एकलव्य + उ अपि (गुणसन्धिः)
एकलव्यो + अपि (पूर्वरूपसन्धिः)
३.अचिरादेव = अचिरात् + एव (जश्त्वसन्धिः)
४.इत्यपृच्छच्च = इति + अपृच्छत् (यण्सन्धिः)
इत्यपृच्छत् + च (श्चुत्वसन्धिः)
५.तस्योपरि = तस्य + उपरि (तस्योपरि)

**५. इतरवचनानि सूचयत –**

१.पितामहः – पितामहौ, पितामहाः

२.शिक्षस्व – शिक्षेथाम्, शिक्षध्वम्

३.पूजयन् – पूजयन्तौ, पूजयन्तः

४.अभषत् – अभषताम्, अभषन्

५.द्रोणाय – द्रोणाभ्याम्, द्रोणेभ्यः

६.भवता – भवद्भ्याम्, भवद्भिः

७.आराधयामास – आराधयामासतुः, आराधयामासु

# ६. पतिव्रतायाः माहात्म्यम्

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत –

**(१) कौशिकः कीदृशो द्विज आसीत् ?**
कौशिकः द्विजातिप्रवरः साङ्गवेदाध्यायी द्विजः आसीत् ।

**(२) वृक्षस्योपरि का स्थिता ?**
वृक्षस्योपरि बलाका स्थिता ।

**(३) कौशिकः पक्षिणं कुतः क्रुद्धया अपश्यत् ?**
कयाचिद्बलाकया ब्राह्मणस्योपरि पूरीषमुत्सृष्टम्, तदा क्रुद्धः स द्विजः बलाकामुग्रदृष्ट्याऽपश्यत् ।

**(४) गृहिणी द्विजं किमवदत् ?**
गृहिणीं भूसुरं दृष्ट्वा सान्त्वपूर्णं अब्रवीत् – 'भो विप्रेन्द्र क्षन्तुमर्हसि । भर्ता मे महद्दैवम् । स चापि क्षुधितः श्रान्तः प्राप्तः । एतावत्पर्यन्तं मया स शुश्रूषितः । इदानीं तव सेवायै अहमागता ।' इति ।

**(५) धर्मव्याधः कुत्र न्यवसत् ?**
धर्मव्याधः मिथिलानगर्यां न्यवसत् ।

## 2. ससन्दर्भं विवृणुत –

**(१) अकार्यं कृतवानस्मि ।**
कः पाठः ? पतिव्रतायाः माहात्म्यम् इति पाठः ।
कः अवदत् ? कौशिकः अवदत् ।
कं प्रति अवदत् ? स्वमनसि अचिन्तयत् ।
कदा अवदत् ? वृक्षस्योपरि स्थितया बलाकया ब्राह्मणस्योपरि पुरीषमुत्सृष्टम् । क्रुद्धः स द्विजः बलाकां उग्रदृष्ट्याऽपश्यत् । अनुपदमेव सा गतप्राणा धरणीतले न्यपतत् । ततः कारुण्याभिसन्तप्तः द्विजः एवं पर्यशोचत् ।

**(२) भवति, भिक्षां देहि ।**
कः पाठः ? पतिव्रतायाः माहात्म्यम् इति पाठः ।
कः अवदत् ? कौशिकः अवदत् ।
कं प्रति अवदत् ? गृहिणीं प्रति अवदत् ।
कदा अवदत् ? कौशिकः भैक्ष्याय कस्याश्चिद् गृहीण्याः सदनं प्रति गत्वा एवम् अवदत् ।

**(३) अग्निसदृशाः द्विजाः पृथिवीमपि दहेयुः ।**
कः पाठः ? पतिव्रतायाः माहात्म्यम् इति पाठः ।
कः अवदत् ? कौशिकः अवदत् ।
कं प्रति अवदत् ? गृहिणीं प्रति अवदत् ।
कदा अवदत् ? यदा गृहिणी मम भर्ता मे महद्दैवतम् इति अवदत् तदा कौशिकः -□ □□पतिः एव गरीयान् इति मन्यसे । माम् अवमन्यसे इति क्रोधात् द्विजस्य गरिमाणम् एवम् अवदत् ।

**(४) भो विप्र, नाहं बलाका ।**
कः पाठः ? पतिव्रतायाः माहात्म्यम् इति पाठः ।
कः अवदत् ? गृहिणी अवदत् ।
कं प्रति अवदत् ? द्विजं प्रति अवदत् ।
कदा अवदत् ? यदा द्विजः गृहिणीं रोषारुणितदृष्ट्या दहन्निवापश्यत्, तदा साध्वी एवम् अवदत् ।

**(५) मनुष्याणां शरीरस्थो रिपुः क्रोधः ।**
कः पाठः ? पतिव्रतायाः माहात्म्यम् इति पाठः ।
कः अवदत् ? गृहिणी अवदत् ।
कं प्रति अवदत् ? द्विजं प्रति अवदत् ।
कदा अवदत् ? यदा द्विजः क्रोधात् गृहिणीं दहन्निवापश्यत् तदा गृहिणी एवम् अवदत् ।

## 3. (१) शब्दस्वरूपं निर्दिशत –

1. पूरयन्– वर्तमानकृदन्तः उभयपदिनः‘पूर’ धातोः शतृ प्रयोगः । तकारान्तः, पुल्लिङ्गः, प्रथमाविभक्तिः, एकवचनम् ।
2. स्थिता– भूतकृदन्तः, स्त्रीलिङ्गः, स्थिता शब्दः, ‘ष्ठा’ गतिनिवृत्तौ धातोः क्तप्रत्ययान्तः ।
3. एत्य– ‘इ’ (गतौ) धातोः ल्यबन्ताव्ययम् ।
4. कर्मणा– नकारान्तः नपुंसकलिङ्गः, कर्मन् शब्दः, तृतीया विभक्तिः, एकवचनम् ।
5. संहर–सम् – उपसर्गपूर्वकस्य ‘हृञ् हरणे’ धातोः परस्मैपदे लोट्, मध्यमपुरुषः, एकवचनम् ।

### 3.(२) पर्यायपदानि लिखत –

1. द्विजः– ब्राह्मणः, भूसुरः ।
2. धरणी– भूमिः, पृथ्वी ।
3. साध्वी– पतिव्रता ।
4. भर्ता– पतिः ।
5. शुश्रूषा– सेवा ।
6. अनुपदम्– तत्क्षणम् ।

**3.(३) कर्तृ – कर्म – क्रियावाचकपदानि विभजत –**

**(१) अकार्यं कृतवानस्मि ।**
कर्तृ – अहं
कर्म - अकार्यम्
क्रिया – कृतवानस्मि
**(२) त्वं पाठं पठ ।**
कर्तृ – त्वम्
कर्म - पाठम्
क्रिया – पठ
**(३) मया स शुश्रूषितः ।**
कर्तृ – मया
कर्म - सः
क्रिया - शुश्रूषितः

# ७. विकत्थनस्य मल्लस्य कथा

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत –

**(१) कीदृशः पुरुषः न किञ्चित्कर्तुमर्हति ?**
वागाडम्बरः पुरुषः न किञ्चित्कर्तुमर्हति ।

**(२) मल्लस्य नाम किम् ?**
वज्रजङ्घः इति मल्लस्य नाम ।

**(३) सः कस्य सभामाससाद ?**
सः मलयालदेशाधिपतेः सुन्दराभिधस्य सभामाससाद ।

**(४) मल्लस्य सामर्थ्यं विशदयत ?**

मल्लः राज्ञः पुत्रान् खुरलीविद्यायां निपुणान् कर्तुं समर्थः आसीत् । महावीरान् मल्लान् शतमप्यैकदैव जेतुं शक्तः । पर्वतानपि शिरसा वोढुं समर्थः । महाव्याघ्रानपि निग्रहीतुं शक्तः आसीत् ।

**(५) मल्लः परिकरं बध्वा राजानं किमुवाच ?**

मल्लः परिकरं बध्वा भुजावास्फाल्य राजानं प्रति 'स्वामिन्, उर्वीधरं वोढुं सन्नद्धोस्मि, आज्ञाप्यन्तां सैनिकाः पर्वतमुद्धृत्य मच्छिरसि निधातुम् इत्यवदत् ।

## 2. संयोज्य सन्धिनाम लिखत-

(१) गर्जत् + घनाः– गर्जद्घनाः = जश्त्वसन्धिः ।

(२) मल्लः + अविद्यत = मल्लोऽविद्यत = विसर्गपूर्वरूपसन्धिः ।

(३) तत् + श्रुत्वा = तच्छ्रुत्वा = छत्वसन्धिः ।

(४) अपि + एकदा + एव = अप्यैकदैव= यण् सन्धिः + वृद्धि सन्धिः ।

(५) गिरिः + अयम् = गिरिरयम् - विसर्गसन्धिः (रेफादेशः) ।

## 3. ससन्दर्भं लिखत –

**१. अत्र स्थित्या वयं निहताः ।**

कः पाठः ? विकत्थनस्य मल्लस्य कथा इति पाठः ।

कः अवदत् ? पौराः अवदन् ।

कं प्रति अवदत् ? राजानं प्रति अवदन् ।

कदा अवदत् ? यदा नगरात् नातिदूरवर्तिनि पर्वते व्याघ्रादयो दुष्टसत्त्वास्समवेतास्सन्तः पौरान् बहुधा बाधन्ते तदा पौराः तु एवम् अवदन् ।

**२. तदनन्तरं यद्भावि तद्भवतु ।**

कः पाठः ? विकत्थनस्य मल्लस्य कथा इति पाठः ।

कः अवदत् ? मल्लः अचिन्तयत् ।

कं प्रति अवदत् ? मल्लः स्वमनसि अचिन्तयत् ।

कदा अवदत् ? यदा राजा गिरिं शिरसा धृत्वा दूरं नेतुं शक्नोषि किम् इति अपृच्छत्, तदा मल्लः किञ्चित्कालपर्यन्तं सुखभोजनं प्राप्तुमुपायः प्राप्तः इति विचिन्त्य एवम् अचिन्तयत् ।

**३. तत्रभवद्भिः सन्निहितैर्भवितव्यम् ।**

कः पाठः ? विकत्थनस्य मल्लस्य कथा इति पाठः ।

कः अवदत् ? मल्लः अवदत् ।

कं प्रति अवदत् ? राजानं प्रति अवदत् ।

कदा अवदत् ? मल्लः संवत्सरपूर्णे गिरिं वोढुं सिद्धः इति राजानं प्रति अवदत् तदा एवम् अवदत् ।

**४. "कथमिमे गिरिमुद्धर्तुं शक्नुयुः " ?**

कः पाठः ? विकत्थनस्य मल्लस्य कथा इति पाठः ।

कः अवदत् ? राजा अवदत् ।

कं प्रति अवदत् ? मल्लं प्रति अवदत् ।

कदा अवदत् ? यदा मल्लः 'तं उर्वीधरं वोढुं सन्नद्धोऽस्मि, आज्ञाप्यन्तां सैनिकाः पर्वतमुद्धृत्य मच्छिरसि निधातुम्' इति अब्रवीत् तदा राजा विस्मितः एवम् अवदत् ।

## 4. एषाम् अनुरूपाणि प्रश्नवाक्यानि रचयत ।

१. मल्लस्य नाम वज्रजङ्घः इति । - मल्लस्य नाम किम् ?
२. महाव्याघ्रानपि निगृह्णीयाम् । - कान् अपि निगृह्णीयाम्?
३. उर्वीधरं वोढुं सन्नद्धोऽस्मि । - कं वोढुं सन्नद्धोऽसि ?

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. व्याकरणभागे स्थितयोः ङमुडागम – पूर्वसवर्णसन्धिनियमयोः अभ्यासं कुरुत ।

3. अस्मिन् पाठे स्थितानां लोट्लकार, लङ्लकार-क्रियापदानां चयनं कृत्वा रूपाणि अभ्यस्यत ।

4. पाठे स्थितानां हलन्त-पुंल्लिङ्ग-शब्दानां चयनं कृत्वा रूपाणां अभ्यासं कुरुत ।

5. पाठे स्थितानाम् नकारान्त – तकारान्त – पुल्लिङ्ग - शब्दानां चयनं कृत्वा रूपाणां अभ्यासं कुरुत ।

6. पाठे स्थितानां ल्यबन्त – शब्दानां चयनं कुरुत ।

7. पाठे स्थितानाम् अव्ययानां चयनं कृत्वा वाक्ये योजयत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१.घनः – जीमूतः, मेघः, वारिवाहः, वारिदः, धूमयोनिः

२.अधिपतिः – स्वामी, ईश्वरः, नायकः, प्रभुः, परिवृढः

स्वामी त्वीश्वरः पतिरीशिता ।
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ॥ (अमरः)

३.व्याघ्रः – शार्दूलः, द्वीपी

शार्दूलद्वीपिनौ व्याघ्रे (अमरः)

४.पर्वतः – अद्रिः, अचलः, शैलः, शिलोच्चयः

महीध्रशिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ (अमरः)

५.जिह्वा – रसज्ञा, रसना

रसज्ञा रसना जिह्वा (अमरः)

**२. समूहेतरपदं चिनुत –**

१.अर्हति, अविद्यत, वर्षन्ति, कुरुतः
२.मल्लः, राजा, व्याघ्रः, पौरः
३.समागत्य, निहतः, स्थित्वा, समीपे
४.साकम्, पर्वतम्, राजानम्, कार्यम्

**३. विरुद्धार्थकपदानि लिखत –**

१.अर्हः – अनर्हः

२.कुर्वाणः – अकुर्वाणः

३.एकदा – अनेकधा

४.दूरम् – समीपम्

**४. व्याकरणविशेषं लिखत –**

१.खुरलीविद्यायाम् – खुरली चासौ विद्या, तस्याम् (कर्मधारयसमासः)

२.प्रतिगृहम् – गृहं गृहं प्रति (अव्ययीभावसमासः)

३.ग्रामीणः – ग्रामे भवः (खञ्प्रत्ययः)

**५. शब्दस्वरूपं निर्दिशत -**

| **रूपम्** | **अन्तः** | **लिङ्गम्** | **प्रातिपदिकम्** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|---|---|
| वाचा | चकारान्तः | स्त्रीलिङ्गः | वाच् | तृतीया | एक० |
| मल्लान् | अकारान्तः | पुल्लिङ्गः | मल्ल | द्वितीया | बहु० |
| विद्यायाम् | आकारान्तः | स्त्रीलिङ्गः | विद्या | सप्तमी | एक० |
| धृतवतः | तकारान्तः | पुल्लिङ्गः | धृतवत् | षष्ठी | एक० |
| इदम् | मकारान्तः | नपुंसकलिङ्गः | इदम् | प्रथमा | एक० |
| भुजाभ्याम् | अकारान्तः | पुल्लिङ्गः | भुज | तृतीया | द्वि० |
| तुभ्यम् | दकारान्तः | त्रिलिङ्गः | युष्मद् | चतुर्थी | एक० |

# ८.श्री शङ्करभगवत्पादाः

## अभ्यासः

### 1.संस्कृते उत्तरं लिखत –

**(१) कालटिग्रामः कुत्रास्ति ?**

कालटि ग्रामः केरले पूर्णानद्यास्तटे अस्ति ।

**(२) शङ्कराचार्यः कदा अवातरत् ?**

शङ्कराचार्यः क्रिस्तीयसप्तमशतके नन्दनसंवत्सरे वैशाखशुक्लपञ्चम्यां तिथौ अवातरत् ।

**(३) शङ्कराचार्यस्य मातापितरौ कौ ?**

शङ्कराचार्यस्य माता आर्याम्बा, पिता शिवगुरुः च ।

**(४) तस्य प्रसिद्धाः शिष्याः के ?**

तस्य प्रसिद्धाः शिष्याः पद्मपादाचार्यः, सुरेश्वराचार्यः, हस्तामलकाचार्यः, तोटकाचार्यः च ।

**(५) कुत्र कुत्र तैः मठाः स्थापिताः ? कुतः ?**

उदीच्यां दिशि बदर्यां ज्योतिर्मठः, पूर्वस्यां जगन्नाथे गोवर्धनमठः, प्रतीच्यां द्वारकायां शारदामठः, दक्षिणस्यां श्रृङ्गेर्यां च शारदामठः, सनातनधर्मोज्जीवनाय तैः स्थापिताः ।

### 2. सन्धिं विगृह्य नाम लिखत –

1. केयम् – का + इयम् = गुणसन्धिः ।

2. जगद्गुरुः – जगत् + गुरुः । = जश्त्वसन्धिः ।
3. पत्युर्वियोगेन = पत्युः + वियोगेन – विसर्गसन्धिः ।
4. मतिरभूत्– मतिः + अभूत् = विसर्गरिफादेश सन्धिः
5. नान्वमन्यत– न + अनु + अमन्यत = सवर्णदीर्घसन्धिः + यण् सन्धिः ।

**3. संयोज्य लिखत –**

| अ | आ |
|---|---|
| गवेषयमाणः | वर्तमानकृदन्तः |
| अवातरत् | तिङन्तः |
| अधीत्य | ल्यबन्ताव्ययम् |
| अनुपदम् | अव्ययम् |

# क्रियापदम्

कारयामास –'कृञ्' धातोः लिट्लकार-परस्मैपदि-रूपाणि णिजन्तः ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | कारयामास | कारयामासतुः | कारयामासुः |
| **मध्यम-पुरुषः** | कारयामासिथ | कारयामासथुः | कारयामास |
| **उत्तम-पुरुषः** | कारयामास | कारयामासिव | कारयामासिम |

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. व्याकरणभागे स्थितानां विसर्गसन्धिनियमानाम् अभ्यासं कुरुत ।

3. पाठे स्थितानां कृञ् धातोः लिट्लकार – परस्मैपदि - रूपाणाम् अभ्यासं कुरुत ।

4. पाठे स्थितानां ल्यबन्त – क्त्वान्त – अव्ययानां चयनं कुरुत ।

5. पाठे विद्यमानानां तकारान्त – पुल्लिङ्ग – शब्दानां चयनं कृत्वा अभ्यस्यत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१.मुनिः – तपस्वी, तापसः, पारिकाङ्क्षी, वाचंयमः

तपस्वी तापसः पारिकाङ्क्षी वाचम्यमो मुनिः । (अमरः)

२.पाखण्डः - सर्वलिङ्गी

३.अन्तेवासी – छात्रः, शिष्यः

४.परश्शतान् – शताधिकान्

५. माता- जनयित्री, प्रसूः, जननी

जनयित्री प्रसूर्माता जननी ।(अमरः)

६.पिता – तातः, जनकः

तातस्तु जनकः पिता ।(अमरः)

**२. प्रयोगपरिवर्तनं कुरुत –**

१.शङ्कराचार्यः प्रस्थानत्रयस्य व्याख्यानं रचितवान् ।

शङ्कराचार्येण प्रस्थानत्रयस्य व्याख्यानं रचितम् ।

२.वटुना सर्वे वेदाः वेदाङ्गानि च अधीतानि ।

वटुः सर्वान् वेदान् वेदाङ्गानि च अधीतवान् ।

३.माता तस्येच्छां न अन्वमन्यत ।

मात्रा तस्येच्छा न अन्वमन्यत ।

४.सः विरुद्धानि पाखण्डमतानि खण्डयामास ।

तेन विरुद्धानि पाखण्डमतानि खण्डितानि ।

**३. प्रत्ययस्य नाम लिखत –**

१.कृतवान् - क्तवतुः

२.परिदृश्यमानम् - शानच्

३.निश्चित्य - ल्यप्

४.मत्वा – क्त्वा

**४. कर्तृ-कर्म-क्रियावाचकपदानि विभजत –**

१.शङ्कराचार्यः कालटीनामकं ग्रामम् अलञ्चकार ।

कर्ता – शङ्कराचार्यः

कर्म – कालटीनामकं ग्रामम्

क्रियापदम् – अलञ्चकार

२.वटुः गृहं परित्यज्य अव्रजत् ।

कर्ता – वटुः

कर्म – गृहम्

क्रियापदम् – अव्रजत्

३.आचार्याः वैदिकधर्मं परिपालयन्ति ।

कर्ता – आचार्याः

कर्म – वैदिकधर्मं

क्रियापदम् – परिपालयन्ति

**५. क्रियापदानां धातु – पद- लकार – पुरुष – वचनानि लिखत -**

| रूपम् | धातुः | पदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| अभ्यगात् | अभि + इण् | परस्मैपदी | लुङ् | प्रथमः | एक० |
| अलञ्चकार | अलम् + कृञ् | परस्मैपदी | लिट् | प्रथमः | एक० |
| अव्रजत् | व्रज् | परस्मैपदी | लङ् | प्रथमः | एक० |
| अन्वमन्यत | मन् | आत्मनेपदी | लङ् | प्रथमः | एक० |
| प्रपेदे | पद् | आत्मनेपदी | लिट् | प्रथमः | एक० |
| रचयामास | रच् | परस्मैपदी | लिट् | प्रथमः | एक० |

# ९.ब्राह्मणः सर्पश्च

## अभ्यासः

### 1.संस्कृते उत्तरं लिखत –

**(१) कृषिं कुर्वता ब्राह्मणेन किं न लब्धम् ?**
कृषिं कुर्वता ब्राह्मणेन समीचीनं फलं न लब्धम् ।

**(२) वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किं दृष्ट्वान् ?**
वृक्षच्छायायां प्रसुप्तः ब्राह्मणः प्रसारितबृहत्फटाटोपभीषणं भुजङ्गमं दृष्ट्वान् ।

**(३) ब्राह्मणः ग्रामान्तरगमनसमये सर्पपूजां कर्तुं कं नियोजयामास ?**
ब्राह्मणः ग्रामान्तरगमनसमये सर्पपूजां कर्तुं पुत्रं नियोजयामास ।

**(४) ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?**
ब्राह्मणपुत्रः दीनारकं दृष्ट्वा चिन्तितवान् – “नूनं सौवर्णदीनारपूर्णो वल्मीकः । तदेनं हत्वा सर्वमेकवारं गृहीष्यामि” इति ।

**(५) भुजङ्गमः रोषात् किमकरोत् ? परिणामः किमभवत् ?**
भुजङ्गमः रोषात्तमेव तीव्रविषदशनैस्तथाऽदशत् यथा स ब्राह्मणपुत्रः सद्यः पञ्चत्वमुपागतः ।

**(६) ब्राह्मणः स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा किममन्यत ?**
ब्राह्मणः स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा मत्पुत्रेण स्वकर्मणः फलम् अनुभूतम् इति अमन्यत ।

### 2. ससन्दर्भं लिखत –

**(१) “नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता” ।**
कः पाठः ? ब्राह्मणः सर्पश्च इति पाठः ।
कः अवदत् ? ब्राह्मणः अवदत् ।

कं प्रति अवदत् ? स्वयं चिन्तयामास ।

कदा अवदत् ? एकस्मिन् दिवसे हरिदत्तो नाम ब्राह्मणः चिन्ताग्रस्तः उष्णकालावसाने घर्मार्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तोऽनतिदूरे वल्मीकोपरि प्रसारितबृहत्फटाटोपभीषणं भुजङ्गं दृष्ट्वा उपर्युक्तं वाक्यमचिन्तयत् ।

**(२) "तदेनं हत्वा सर्वमेकवारं ग्रहीष्यामि" ।**

कः पाठः ? ब्राह्मणः सर्पश्च इति पाठः ।

कः अवदत् ? ब्राह्मणपुत्रः अवदत् ।

कं प्रति अवदत् ? स्वयं चिन्तयामास ।

कदा अवदत् ? ब्राह्मणस्य अनुपस्थितौ सर्पाय क्षीरं स्थापयित्वा पुत्रः दिनान्तरे तत्र दीनारकमेकं दृष्ट्वा गृहीत्वा च लोभेन आवृतो भूत्वा एवं चिन्तितवान् ।

**(३) "सर्पेण युक्तमेव कृतम्" ।**

कः पाठः ? ब्राह्मणः सर्पश्च इति पाठः ।

कः अवदत् ? ब्राह्मणः अवदत् ।

कं प्रति अवदत् ? स्वमनसि अमन्यत ।

कदा अवदत् ? लोभाविष्टस्य पुत्रस्य सर्पदंशनेन मरणं प्राप्तमिति वार्तां श्रुत्वा ब्राह्मणः एवम् अचिन्तयत् ।

## 3. पर्यायपदानि लिखत –

1) क्षीरं– दुग्धम्, पयः । दुग्धं **क्षीरं** पयः समम् (अमरः) ।
2) भुजङ्गमः– सर्पः, अहिः । **सर्पः** पृदाकुर्भुजगो भुजङ्गोहिर्भुजङ्गमः (अमरः) ।
3) अन्तिकम्– समीपम् ।
4) गृहम्– सदनम्, वेश्म । **गृहं** गेहोदवसितं वेश्म सद्म निकेतनम् (अमरः) ।

## 4. विभज्य सन्धिनाम लिखत –

1) अथैकस्मिन् – अथ + एकस्मिन् = वृद्धिसन्धिः
2) कदाचिदपि = कदाचित् + अपि = जश्त्वसन्धिः
3) तेनेदम् = तेन + इदम् = गुणसन्धिः
4) अब्रवीच्च = अब्रवीत् + च = श्चुत्वसन्धिः
5) प्रसुप्तोऽनतिदूरे– प्रसुप्तः + अनतिदूरे - विसर्ग पूर्वरूपसन्धिः

## 5. प्रयोगपरिवर्तनं कुरुत –

**(१) तेन पूजा न कृता ।**

सः पूजां न कृतवान् ।

**(२) ब्राह्मणपुत्रेण सर्पः लगुडेन शिरसि ताडितः ।**

ब्राह्मणपुत्रः सर्पं लगुडेन शिरसि ताडितवान् ।

**(३) मत्पुत्रः स्वकर्मणः फलम् अनुभूतवान् ।**

मत्पुत्रेण स्वकर्मणः फलम् अनुभूतम् ।

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. पाठे स्थितानां लङ् – लोट् – लकाराणां रूपाणां अभ्यासं कुरुत ।

3. पाठे स्थितानां हलन्त – शब्दानां चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

4. पाठे स्थितानां ल्यबन्त – क्त्वान्त – तुमुन्नन्त – अव्ययानां चयनं कुरुत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१) भुजङ्गः – अहिः, व्यालः, कुण्डली, कुम्भीनसः
सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ।
आशीविषो विषधरश्चक्री व्यालसरीसृपः ॥
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ।
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥
लेलिहानो द्विरसनो व्यालः कुम्भीनसो हरिः । (अमरः)

२) शरावः – वर्धमानकः

३) वल्मीकः – वामलूरः, नाकुः
वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम् । (अमरः)

४) सम्प्रधार्य – ज्ञात्वा

५) क्षीरम् – पयः

६) मरणम् – कालधर्मः, दिष्टान्तः, पञ्चता
स्यात् पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ॥ (अमरः)

**२. विरुद्धार्थकपदानि लिखत –**

१) अतिदूरे – अनतिदूरे

२) कुर्वतः – अकुर्वतः

३) विफलीभवति – सफलीभवति

४) अभिमुखं – अनभिमुखम्

५) एकवारं – अनेकवारम्

**३. समूहेतरपदं चिनुत –**

१) ब्राह्मणः, क्षीरम्, पुत्रः, सर्पः

२) एकम्, दीनारकम्, सौवर्णम्, क्षीरम्

३) उपगतः, संस्कृतः , समायातः, हत्वा

४) प्रायात् , जगाम, अनुभूतम्, गृह्णाति

**४. वाक्यदोषं परिहरत –**

१) एषः क्षेत्रदेवता मया न पूजितः ।
एषा क्षेत्रदेवता मया न पूजिता ।

२) मया एतावद् कालं न ज्ञातम् ।
मया एतावन्तं कालं न ज्ञातम् ।

३) एवमुक्त्वा गृहाऽभिमुखं प्रायुः ।
एवमुक्त्वा गृहाऽभिमुखं प्रायात् ।

४) सर्पो लगुडेन शिरे ताडितः ।
सर्पो लगुडेन शिरसि ताडितः ।

**५. अन्यलिङ्गरूपं लिखत –**

१) ब्राह्मणः – ब्राह्मणी

२) एषा – एषः, एतत्

३) दृष्टवान् – दृष्टवती, दृष्टम्

४) समायातः – समायाता, समायातम्

**६. इतरवचनानि लिखत –**

१) ददाति – दत्तः, ददति

२) चिन्तितवान् – चिन्तिवन्तौ, चिन्तितवन्तः

३) गृह्णाति – गृह्णीतः, गृह्णन्ति

४) काष्ठसञ्चयैः – काष्ठसञ्चयेन, काष्ठसञ्चयाभ्याम्

५) स्वजनेभ्यः – स्वजनात्, स्वजनाभ्याम्

६) प्रायात् – प्रायाताम्, प्रायुः-प्रायान्

# १०.सुभाषितानि

## अभ्यासः

### 1. संस्कृते उत्तरं लिखत –

**(१) कृतमुपकारं के न विस्मरन्ति ?**
कृतमुपकारं साधवः न विस्मरन्ति ।

**(२) नरः आत्मनश्चरितं प्रत्यहं कथं प्रत्यवेक्षेत ?**
नरः आत्मनश्चरितं प्रत्यहं “किं नु मे पशुभिः तुल्यं किं सत्पुरुषैः” इति प्रत्यवेक्षेत ।

**(३) धीराः कस्मात् पदं न प्रविचलन्ति ?**
धीराः न्याय्यात् पथः पदं न प्रविचलन्ति ।

**(४) के के त्याज्याः ?**
घृणी राजा, सर्वभक्षी ब्राह्मणः, अत्रपा स्त्री, दुष्टमतिः सहायः, प्रतीपः प्रेष्यः, प्रमादी अधिकृतः, यः कृतं न वेत्ति, अमी त्याज्याः ।

**(५) राक्षसाः के ?**
विपरीततां गताः साक्षराः एव राक्षसाः ।

**(६) केषां मतिः क्षीयते ?**
प्रत्यासन्नविपत्तिमूढमनसां मतिः क्षीयते ।

**(७) केषां बन्धनं भवति ?**
गजभुजङ्गविहङ्गमबन्धनं भवति ।

**(८) विद्यार्थी चेत् किं त्यजेत् ?**
**विद्यार्थी** चेत् सुखं त्यजेत् ।

**(९) के जयन्ति ?**
सुकृतिनः रससिद्धाः कवीश्वराः सदा जयन्ति ।

**(१०) कथम् अनार्यः पतति ?**
अनार्यः मृत्पिण्डपतनम् इव पतति ।

## 2. ससन्दर्भं विवृणुत ।

**(१) "केवलं जगति तेऽपि राक्षसाः" ।**
कः पाठः ? सुभाषितानि इति पाठः ।
कः अवदत् ? लेखकः अवदत् ।
कं प्रति अवदत् ? पाठकान् प्रति अवदत् ।
कदा अवदत् ? कोऽपि दुष्टः विद्यया विमलया अपि संयुक्तः (तस्मै) सदसि न प्रवेशः दातव्यः । यतः साक्षराः एव प्रतीपाः जगति राक्षसाः । [ते स्वज्ञानं दुर्मार्गे नेष्यन्ति]

**(२) "विधिरहो बलवानिति मे मतिः" ।**
कः पाठः ? सुभाषितानि इति पाठः ।
कः अवदत् ? लेखकः अवदत् ।
कं प्रति अवदत् ? पाठकान् प्रति अवदत् ।
कदा अवदत् ? अत्र कविः विधेः माहात्म्यं वदति । विधेः कारणादेव सूर्यचन्द्रयोः ग्रहपीडनं, गजसर्पपक्षिणां बन्धनम्, मतिमतां दरिद्रता च भवति । अतः विधिः एव बलवान् ।

**(३) "कुतो विद्यार्थिनः सुखम् ?"**
कः पाठः ? सुभाषितानिइति पाठः ।
कः अवदत् ? लेखकः अवदत् ।
कं प्रति अवदत् ? पाठकान् प्रति अवदत् ।
कदा अवदत् ? सुखार्थी विद्यां त्यजेत्, विद्यार्थी चेत् सुखम् त्यक्तव्यम् । यदि सुखार्थी विद्यां न त्यजति तर्हि सः सुखं न प्राप्नोति, यदि विद्यार्थी सुखं न त्यजति, तर्हि सः विद्यार्जनं कर्तुम् अशक्तः भवति ।

**(४) “प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ।“**

कः पाठः ? सुभाषितानि इति पाठः ।

कः अवदत् ? लेखकः अवदत् ।

कं प्रति अवदत् ? पाठकान् प्रति अवदत् ।

कदा अवदत् ? रावणः सीतापहरणसमये स्वदोषं न विज्ञातवान् । रामेण अपि हेमहरिणस्य असम्भवः अलक्षितः । युधिष्ठिरेण अपि द्यूतैः अनर्थः प्राप्तः । एवं हि यदा विपत्तिः मनः आच्छादयति, तदा मनुष्यस्य बुद्धिः क्षीणा भवति ।

## 3. सर्वपुरुषवचनेषु लिखत –

**ददाति– दा धातोः लट् लकारः परस्मैपदि रूपाणि ।**

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | ददाति | दत्तः | ददति |
| **मध्यम-पुरुषः** | ददासि | दत्थः | दत्थ |
| **उत्तम-पुरुषः** | ददामि | दद्वः | दद्मः |

**अस्तु– अस् धातोः लोट् लकारः परस्मैपदि रूपाणि ।**

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | अस्तु / स्तात् | स्ताम् | सन्तु |
| **मध्यम-पुरुषः** | एधि / स्तात् | स्तम् | स्त |
| **उत्तम-पुरुषः** | असानि | असाव | असाम |

**वेत्ति– विद् धातोः लट् लकारः परस्मैपदि रूपाणि ।**

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | वेत्ति | वित्तः | विदन्ति |
| **मध्यम-पुरुषः** | वेत्सि | वित्थः | वित्थ |
| **उत्तम-पुरुषः** | वेद्मि | विद्वः | विद्मः |

**क्षीयते–क्षि धातुः लट् लकारः परस्मैपदि रूपाणि**

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | क्षीयते | क्षीयेते | क्षीयन्ते |
| **मध्यम-पुरुषः** | क्षीयसे | क्षीयेथे | क्षीयध्वे |
| **उत्तम-पुरुषः** | क्षीये | क्षीयावहे | क्षीयामहे |

**स्तौतु– स्तु धातुः लोट् लकारः परस्मैपदि रूपाणि ।**

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | स्तौतु / स्तुतात् | स्तुताम् | स्तुवन्तु |
| **मध्यम-पुरुषः** | स्तुहि / स्तुतात् | स्तुतम् | स्तुत |
| **उत्तम-पुरुषः** | स्तवानि | स्तवाव | स्तवाम |

**निन्दतु– निन्द् धातोः लोट् लकारः परस्मैपदि रूपाणि ।**

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | निन्दतु / निन्दतात् | निन्दताम् | निन्दन्तु |

| | | | |
|---|---|---|---|
| **मध्यम-पुरुषः** | निन्द / निन्दतात् | निन्दतम् | निन्दत |
| **उत्तम-पुरुषः** | निन्दानि | निन्दाव | निन्दाम |

## 4. पर्यायपदानि लिखत –

1. घृणी - दयालुः
2. मतिः - बुद्धिः
3. विहङ्गमः - खगः
4. गजः - करी
5. तोयम् - जलम्
6. यशः - कीर्तिः

## 5. रिक्तस्थानानि पूरयत –

(१) शिरसि निहितभारा नारिकेला नराणाम् ।

(२) प्रत्यहं प्रत्यवेक्षेत नरः चरितम् आत्मनः ।

(३) स्त्री च अत्रपा दुष्टमतिः सहायः ।

(४) सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी वा त्यजेत् सुखम् ।

(५) पौलस्त्यः कथं अन्यदारहरणे दोषं न विज्ञातवान् ।

# क्रियापदानि

1. प्रति + अव + ईक्ष् – विधिलिङ् लकारः (प्रत्यवेक्षेत), आत्मनेप**दि** रूपाणि ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | ईक्षेत | ईक्षेयाताम् | ईक्षेरन् |
| **मध्यम-पुरुषः** | ईक्षेथाः | ईक्षेयाथाम् | ईक्षेध्वम् |
| **उत्तम-पुरुषः** | ईक्षेय | ईक्षेवहि | ईक्षेमहि |

2. निन्द् धातुः लोट् लकारः, परस्मैप**दि** रूपाणि । (निन्दन्तु)

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | निन्दतु, निन्दतात् | निन्दताम् | निन्दन्तु |
| **मध्यम-पुरुषः** | निन्द, निन्दतात् | निन्दतम् | निन्दत |
| **उत्तम-पुरुषः** | निन्दानि | निन्दाव | निन्दाम |

3. स्तु धातुः लोट् लकारः (स्तुवन्तु) परस्मैप**दि** रूपाणि ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | स्तौतु, स्तुतात् | स्तुताम् | स्तुवन्तु |
| **मध्यम-पुरुषः** | स्तुहि, स्तुतात् | स्तुतम् | स्तुत |
| **उत्तम-पुरुषः** | स्तवानि | स्तवाव | स्तवाम |

4. विद् धातुः लट् लकारः (वेत्ति) आत्मनेप**दि** रूपाणि ।

| **पुरुषः/विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम-पुरुषः** | वेत्ति | वित्तः | विदन्ति |
| **मध्यम-पुरुषः** | वेत्सि | वित्थः | वित्थ |
| **उत्तम-पुरुषः** | वेद्मि | विद्वः | विद्मः |

5. क्षि धातुः लट् लकारः आत्मनेप**दि** रूपाणि ।

| **पुरुषः/विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम-पुरुषः** | क्षीयते | क्षीयेते | क्षीयन्ते |
| **मध्यम-पुरुषः** | क्षीयसे | क्षीयेथे | क्षीयध्वे |
| **उत्तम-पुरुषः** | क्षीये | क्षीयावहे | क्षीयामहे |

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. पाठे स्थितानां नकारान्त – पुल्लिङ्ग – शब्दानां चयनं कृत्वा रूपाणि अभ्यस्यत ।

3. पाठे स्थितानां क्रियारूपाणां अभ्यासं कुरुत ।

4. पाठे स्थितानां ल्यबन्त – क्त्वान्त – तुमुन्नन्त – अव्ययानां चयनं कुरुत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१) तोयम् – वारि, सलिलम्, पयः, कीलालम्
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥
कृपीटं काण्डमस्त्री स्याज्जीवनीयं कुशं विषम् । (अमरः)

२) लक्ष्मीः – पद्मालया, पद्मा, कमला, हरिप्रिया
लक्ष्मीः पद्मालया पद्मा कमलाश्रीर्हरिप्रिया ।
इन्दिरा लोकमाता मा रमा मङ्गलदेवता ॥
भार्गवी लोकजननी क्षीरसागरकन्यका । (अमरः)

३) हरिणः – मृगः, कुरङ्गः, वातायुः, अजिनयोनिः
मृगे कुरङ्गवातायुहरिणाजिनयोनयः । (अमरः)

४) निशाकरः – चन्द्रः, हिमांशुः, इन्दुः, कुमुदबान्धवः
हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
विधुस्सुधांशुश्शुभ्रांशुरोषधीशो निशापतिः ॥
अब्जो जैवातृकस्सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजश्शशधरो नक्षत्रेशः क्षपाकरः ॥ (अमरः)

५) कायः – शरीरम्, वपुः, गात्रम्, कलेवरम्

गात्रं वपुस्संहननं शरीरं वर्ष्म विग्रहः ।
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ॥ (अमरः)

६) गजः – दन्ती, दन्तावलः, हस्ती, द्विरदः
दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥
इभः स्तम्बेरमः पद्मी (अमरः)

**२. सन्धिं विभज्य नाम लिखत –**

१) अनल्पास्वादम् – अनल्प + आस्वादम् (सवर्णदीर्घसन्धिः)

२) प्रत्यवेक्षेत – प्रति + अवेक्षेत (यण्सन्धिः)

३) यथेष्टम् – यथा + इष्टम् (गुणसन्धिः)

४) पतन्नपि – पतन् + अपि (ङमुडागमसन्धिः)

**३. प्रश्नवाक्यानि लिखत –**

१) नारिकेलाः अनल्पास्वादं जलं ददति ।
के अनल्पास्वादं जलं ददति?

२) नरः प्रत्यहम् आत्मनश्चरितं प्रत्यवेक्षेत ।
नरः प्रत्यहं किं प्रत्यवेक्षेत ?

३) धीराः न्यायात् पथः पदं न प्रविचलन्ति ।
धीराः कस्मात् पथः पदं न प्रविचलन्ति ?

४) प्रायः प्रत्यासन्नविपत्तिमूढमनसां मतिः क्षीयते ।
प्रायः केषां मतिः क्षीयते ?

**४. व्याकरणविशेषं लिखत –**

१) प्रथमवयसि – प्रथमं च तत् वयः च, तस्मिन् (कर्मधारयसमासः)

प्रथमवयस् इति सकारान्त – नपुंसकलिङ्गशब्दस्य सप्तमी - एकवचने रूपम् ।

२) विस्मरन्ति – वि –उपसर्गपूर्वक – स्मृ – चिन्तायाम् इति परस्मैपदि - धातोः लटि प्रथमपुरुष – बहुवचने रूपम् ।

३) नीतिनिपुणाः – नीतेः निपुणाः (षष्ठीतत्पुरुषसमासः)

४) विलोक्य – वि – उपसर्गपूर्वक – लोकृ विलोचने धातोः ल्यप् प्रत्यये रूपम् ।

**५) एतेषां क्रियापदानां धातु – पद- लकार पुरुष – वचनानि लिखत —**

| **रूपम्** | **धातुः** | **पदम्** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|---|
| प्रत्यवेक्षेत | प्रति + अव + ईक्ष् | आत्मनेपदम् | विधिलिङ् | प्रथमः | एक० |
| स्तुवन्तु | स्तु | परस्मैपदम् | लट् | प्रथमः | बहु० |
| त्यजेत् | त्यज् | परस्मैपदम् | विधिलिङ् | प्रथमः | एक० |
| समाविशतु | सम् + आ + विश् | परस्मैपदम् | लोट् | प्रथमः | एक० |
| पतति | पत् | परस्मैपदम् | लट् | प्रथमः | एक० |

# ११.ब्रह्मस्तवः

## प्रश्नाः

### 1. संस्कृतभाषया उत्तरं लिखत –

**(१) तारकेण विप्रकृताः देवाः कुत्र ययुः ?**

तारकेण विप्रकृताः देवाः स्वायम्भुवं धाम ययुः ।

**(२) पितामहः आत्मानं कथं दर्शितवान् ?**

पितामहः आत्मानं सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव दर्शितवान् ।

**(३) सर्वे देवाः कं स्तोतुं समुपचक्रिरे ?**

सर्वे देवाः यथार्थभूताभिः वाग्भिः वागीशं स्तोतुं समुपचक्रिरे ।

**(४) भूतानां प्रलयोदयौ कौ ?**

ब्रह्मणः स्वप्नावबोधौ भूतानां प्रलयोदयौ ।

### 2. विरुद्धार्थकपदानि लिखत –

1.सृष्टिः x नाशः, संहारः

2.उपक्रमः x उपसंहारः

3.सूक्ष्मः x स्थूलः

4.दिवा x रात्रिः

5.प्रकाशः x अन्धकारः

### 3. पर्यायपदानि लिखत –

1. ब्रह्मा– वागीशः, पितामहः
2. देवाः– सुराः, अमराः
3. तुराषाट्– इन्द्रः, पुरन्दरः
4. विभूतिः–ऐश्वर्यम्, धनम्

### 4. वाक्ये योजयत –

1. धाम – पुरीक्षेत्रं जगन्नाथधाम वर्तते ।
2. पश्चात् = रामः स्नाति, पश्चात् देवं नमति ।
3. प्राक् = भोजनात् प्राक् कृष्णः स्तोत्रं वदति ।
4. सर्गः = ब्रह्मणा एषः सर्गः विष्णोराज्ञया कृतः ।

5. वेत्सि = किं त्वम् एतस्य प्रश्नस्य उत्तरं वेत्सि ?
6. असि = इदानीं त्वं कुत्र असि ?
7. शाश्वतः = महर्षिणा व्यासेन रचितः ग्रन्थः शाश्वतः ।
8. नमः = महद्भ्यो नमः ।

# क्रियापदानि रूपाणि ।

1. **'भू'** धातुः लुङ्लकार-(आविरभूत्)-परस्मैपदि-रूपाणि ।

| **पुरुषः/विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम-पुरुषः** | अभूत् | अभूताम् | अभूवन् |
| **मध्यम-पुरुषः** | अभूः | अभूतम् | अभूत |
| **उत्तम-पुरुषः** | अभूवम् | अभूव | अभूम |

2.**'विद'** धातुः-लट्लकारः-(विदुः)-आत्मनेपदि-रूपाणि ।

| **पुरुषः/विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम-पुरुषः** | वेद | विदतुः | विदुः |
| **मध्यम-पुरुषः** | वेत्थ | विदथुः | विद |
| **उत्तम-पुरुषः** | वेद | विद्व | विद्म |

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. पाठे स्थितानाम् हलन्त - शब्दानां चयनं कृत्वा रूपाणां च अभ्यासं कुरुत ।

3. पाठे स्थितानां क्रियारूपाणाम् अभ्यासं कुरुत ।

4. पाठे स्थितानां सर्वनामशब्दानां चयनं कृत्वा वदत, रूपाणां च अभ्यासं कुरुत ।

5. पाठे स्थितानाम् अव्ययानां चयनं कृत्वा वाक्ये योजयत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१) कर्म - क्रिया

२) दीधितिमान् – सूर्यः, द्युमणिः, प्रद्योतनः, विरोचनः, तपनः

सूरसूर्यार्यमादित्य द्वादशात्मदिवाकराः ।
भास्कराहस्करब्रध्नप्रभाकरदिवाकराः ॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥ (अमरः)

३) अप् – जीवनम्, उदकम्, भुवनम्, पानीयम्

४) पुमान् – मनुष्यः, मानुषः, मर्त्यः
मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषाः नरः ॥ (अमरः)

**२. समूहेतरपदं चिनुत –**

१) स्वयम्भुवम्, तुरासाहम्, चतुर्मुखम्, ब्रह्माणम्

२) ययुः, समुपचक्रिरे, गीयसे, उपतस्थिरे

३) तेषाम्, प्राक्, पश्चात्, अन्तः

४) स्त्रीपुंसौ, आत्मभागौ, पितरौ, निरन्तकः

**३. व्याकरणविशेषं लिखत –**

१) अयोनिः – अविद्यमाना योनिः (बहुव्रीहिसमासः)

२) उदीरयन् – उद् – उपसर्गपूर्वक – ईर – धातोः शतृप्रत्यये रूपम् ।

३) पितरौ – माता च पिता च (एकशेषः)
ऋकारान्त – पुल्लिङ्ग – पितृशब्दस्य प्रथमा-द्विवचने रूपम् ।

४) प्रलीयसे – प्र – उपसर्गपूर्वक – आत्मनैपदि - लीङ् – धातोः लट्लकार – मध्यमपुरुष – एकवचने रूपम्

**४. प्रश्नवाक्यानि लिखत –**

१) नारीपुरुषौ तव स्वदेहांशौ भवतः ।
कौ तव स्वदेहांशौ भवतः ?

२) स्वप्नावबोधौ भूतानां प्रलयोदयौ ।
स्वप्नावबोधौ केषां प्रलयोदयौ ?

३) त्वं स्थूलः, सूक्ष्मः, लघुः, गुरुः च असि ।
त्वं कीदृशोऽसि ?

४) त्वं आत्मना आत्मनि प्रलीयसे ।
त्वं केन कस्मिन् प्रलीयसे ?

**५. सर्ववचनेषु रूपाणि लिखत –**

१) ब्रह्मा – ब्रह्माणौ, ब्रह्माणः

२) ययुः – ययौ, ययतुः

३) आत्मानम् - आत्मानौ, आत्मनः

४) सरसाम् – सरसः, सरसोः

५) दीधितिमान् – दीधितमन्तौ, दीधितिमन्तः

६) गीयसे – गीयेथे, गीयध्वे

७) कृतिना – कृतिभ्यां, कृतिभिः

# १२.रामोदन्ते सुन्दरकाण्डः

## अभ्यासः

**1. संस्कृते उत्तरं लिखत –**

**(१) हनूमान् समुद्रस्योपरि किं किं चकार ?**
हनूमान् समुद्रस्योपरि मैनाकं समुल्लङ्घ्य, सुरसां जित्वा, सिंहिकां हत्वा, ततः समुद्रस्य पारं प्राप ।

**(२) सीता कुत्र कथं अवर्तत ?**
सीता अशोकवने खिन्ना अवर्तत ।

**(३) रावणः सीतां किमवदत् ?**
रावणः सीतां अवदत् – "हे मैथिलि, त्वं मम पत्नी भव" इति ।

**(४) रावणस्य कोपः कथमभवत् ?**
रावणस्य कोपः कामेन मन्युना पूरितः अभवत् ।

**(५) हनूमान् सीतां कथम् आश्वासयामास ?**
हनुमान् सीतां –"हे देवि, मा विषादं कुरु । रामः रावणं रणे हनिष्यति । त्वां नेष्यति" इति च उक्त्वा आश्वासयामास ।

**(६) मारुतिः रावणस्य समीपं गन्तुं कथं शक्तोऽभवत् ?**
मारुतिः सीताम् आश्वास्य अशोकवनिकां बभञ्ज । अक्षादीनि बहूनि रक्षांसि समरे अवधीत् । तदा शक्रजिता युद्धे बद्धः रावणस्य समीपे गन्तुं शक्तोऽभवत् ।

### 2. सन्धिकार्यं कृत्वा लिखत –

1. गच्छन् + तत्र = गच्छंस्तत्र - सत्वसन्धिः
2. राम + इति = रामेति = गुणसन्धिः
3. रावणः + अथ = रावणोऽथ - विसर्गसन्धिः
4. कं + चित् =कञ्चित् = परसवर्णसन्धिः
5. इति + एनाम् = इत्येनाम् = यण् सन्धिः
6. गिरेः + तस्मात् = गिरेस्तस्मात् = विसर्गसन्धिः

### 3. सर्वपुरुषवचनेषु लिखत –

आस्ते–'आस्' धातोः लट् लकारः आत्मनेपदि - रूपाणि

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम-पुरुषः** | आस्ते | आसाते | आसते |
| **मध्यम-पुरुषः** | आस्से | आसाथे | आध्वे |

| | | | |
|---|---|---|---|
| **उत्तम-पुरुषः** | आसे | आस्वहे | आस्महे |

ददर्श –'दृश्' धातोः लिट् लकारः आत्मनेपदि - रूपाणि

| **पुरुषः/विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम-पुरुषः** | ददर्श | ददृशतुः | ददृशुः |
| **मध्यम-पुरुषः** | ददर्शिय, दद्रष्ठ | ददृशथुः | ददृश |
| **उत्तम-पुरुषः** | ददर्श | ददृशिव | ददृशिम |

अयाचत –'याच्' धातोः लङ् लकारः आत्मनेपदि - रूपाणि

| **पुरुषः/विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम-पुरुषः** | अयाचत | अयाचेताम् | अयाचन्त |
| **मध्यम-पुरुषः** | अयाचथाः | अयाचेथाम् | अयाचध्वम् |
| **उत्तम-पुरुषः** | अयाचे | अयाचावहि | अयाचामहि |

ययौ –'या' धातोः लिट् लकारः आत्मनेपदि - रूपाणि

| **पुरुषः/विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथम-पुरुषः** | ययौ | ययतुः | ययुः |
| **मध्यम-पुरुषः** | ययिथ/ ययाथ | ययथुः | यय |
| **उत्तम-पुरुषः** | ययौ | ययिव | ययिम |

## 4. व्याकरणविशेषं लिखत –

**(१) आस्ते स्म –**

'लट् स्मे' इति पाणिनिसूत्रानुसारेण यदा 'स्म' इति अव्ययस्य प्रयोगः भवति तदा लट् लकारः (वर्तमानार्थकः) भूतकालं सूचयति (एवमत्र आस्ते स्म भूतकालं सूचयति)।

**(२) विषादं मा कृथाः–**

'न माङ् योगे' इति पाणिनिसूत्रानुसारेण यदा मा इति अव्ययस्य प्रयोगः भवति तदा पुरस्तात् वर्तमानस्य क्रियापदस्य "अ" कारस्य (अडागमस्य) लोपः भवति। (एवमत्र अकृथाः इति क्रियापदं "कृथा" इति भवति।)

## 5. विग्रहवाक्यं लिखत –

नीतिमान्– नीतिः यस्य अस्ति इति नीतिमान् (मतुप् प्रत्ययः)।

शक्रजित्– शक्रं जितवान् इति शक्रजित्।

मारुतिः– मरुतः अपत्यं पुमान् मारुतिः।

अनिलात्मजः– अनिलस्य आत्मजः। (षष्ठीतत्पुरुषसमासः)

# क्रियापद रूपाणि

1. 'दृश्' धातुः लिट् लकारः (ददर्श)

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम-पुरुषः | ददर्श | ददृशतुः | ददृशुः |
| मध्यम-पुरुषः | ददर्शिथ, दद्रष्ठ | ददृशथुः | ददृश |
| उत्तम-पुरुषः | ददर्श | ददृशिव | ददृशिम |

2.'सम् + याच्' धातुः-लङ्लकारः (समयाचत)-आत्मनेपदि-रूपाणि ।

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम-पुरुषः | समयाचत | समयाचेताम् | समयाचन्त |
| मध्यम-पुरुषः | समयाचथाः | समयाचेथाम् | समयाचध्वम् |
| उत्तम-पुरुषः | समयाचे | समयाचावहि | समयाचामहि |

3. 'प्र + दा (डुदाञ्)' धातुः, लिट्लकारः (प्रददौ)

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम-पुरुषः | प्रददौ | प्रददतुः | प्रददुः |
| मध्यम-पुरुषः | प्रददिथ, प्रददाथ | प्रददथुः | प्रदद |
| उत्तम-पुरुषः | प्रददौ | प्रददिव | प्रददिम |

4. 'वि + निर् + या' धातुः, लिट्लकारः (विनिर्ययौ)

| पुरुषः/विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम-पुरुषः | विनिर्ययौ | विनिर्ययतुः | विनिर्ययुः |
| मध्यम-पुरुषः | विनिर्ययिथ, विनिर्ययाथ | विनिर्ययथुः | विनिर्यय |
| उत्तम-पुरुषः | विनिर्ययौ | विनिर्ययिव | विनिर्ययिम |

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. पाठे स्थितानां हलन्तशब्दानाम् अभ्यासं कुरुत ।

3. पाठे स्थितानां परस्मैपदि- धातूनां लिट्लकार – लुङ् लकार – रूपाणां चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

4. पाठे विद्यमानानां विशेषणवाचकपदानां चयनं कुरुत ।

5. पाठे स्थितानां ल्यबन्त – क्त्वान्त – तुमुन्नन्त – अव्ययानां चयनं कुरुत ।

**लेखनाभ्यासः**

**१)पर्यायपदानि लिखत –**

१) महोदधिः – अब्धिः, अकूपारः, रत्नाकरः, जलनिधिः
समुद्रोऽब्धिरकूपारः पारावारस्सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ॥

रत्नाकरो जलनिधिः यादःपतिरपाम्पतिः । (अमरः)

२) निशा – निशीथिनी, रात्रिः, त्रियामा, क्षणदा, विभावरी
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥ (अमरः)

३) पलाशः – पत्रम्, छदनम्, दलम्, पर्णम्
पत्रं पलाशं छदनं दलं पर्णं छदः पुमान् । (अमरः)

४) वानरः – कपिः, प्लवङ्गः, शाखामृगः, मर्कटः, वनौकः
कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौका ।(अमरः)

**२)प्रयोगपरिवर्तनं कुरुत –**

१) हनूमान् खिन्नां सीतां ददर्श ।
हनूमता खिन्ना सीता ददृशे ।

२) अनिलात्मजः निद्राणं रावणं अद्राक्षीत् ।
अनिलात्मजेन निद्राणः रावणः अदर्शि ।

३) मदनार्दितः रावणः मैथिलीम् समयाचत ।
मदनार्दितेन रावणेन मैथिली समयाचत ।

४) पवनात्मजः पौलस्त्यम् उक्तवान् ।
पवनात्मजेन पौलस्त्यः उक्तः ।

**३)विरुद्धार्थकपदानि लिखत –**

१) दत्तवान् – स्वीकृतवान्

२) बन्धितः – निर्बन्धितः

३) उक्त्वा – अनुक्त्वा

५) खिन्नाम् – सन्तुष्टाम्

**४)व्याकरणविशेषं लिखत –**

१)महोदधेः – महान् उदधिः , तस्य (कर्मधारयसमासः)

२)विचिन्वन् – वि – उप्सर्गपूर्वक – चिञ् चयने धातोः शतृप्रत्यये रूपम् ।

३)जघान – परस्मैपदि- हन – हिंसागत्योः इति धातोः लिटि प्रथमपुरुष- एकवचने रूपम् ।

४)नीतिमान् – नीतिः अस्य अस्तीति विग्रहः । मतुप्प्रत्ययान्तं रूपम् ।

५)वानरैः साकम् – 'साकम्' इति अव्ययेन योगे तृतीयाविभक्तिः ।

**५)क्रियापदानां धातु – पद- लकार – पुरुष – वचनानि लिखत -**

| **रूपम्** | **धातुः** | **पदम्** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|---|
| बभञ्ज | भञ्ज् | परस्मैपदी | लिट् | प्रथमः | एक० |

| | | | | | |
|---|---|---|---|---|---|
| जघान | हन् | परस्मैपदी | लिट् | प्रथमः | एक० |
| नेष्यति | नी | परस्मैपदी | लृट् | प्रथमः | एक० |
| अद्राक्षीत् | दृश् | परस्मैपदी | लुङ् | प्रथमः | एक० |
| पुप्लुवे | प्लु | आत्मनेपदी | लिट् | प्रथमः | एक० |

# १३.पञ्चतन्त्र – कथामुखम्

# मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।

## अभ्यासः

**1. संस्कृतभाषया उत्तरं लिखत –**

**(१) नयशास्त्रकर्तारः के ?**
मनुः, वाचस्पतिः, शुक्रः, पराशरः, व्यासः, चाणक्यः एते नयशास्त्रकर्तारः ।

**(२) अमरशक्तेः पुत्राः के ? कीदृशास्ते ?**
अमरशक्तेः पुत्राः बहुशक्तिः, उग्रशक्तिः, अनन्तशक्तिः । ते शास्त्रविमुखाः विवेकरहिताः च आसन् ।

**(३) राजा स्वकुमारान् विवेकिनः कर्तुं किं चकार ?**
राजा तान् शास्त्रविमुखानालोक्य सचिवानाहूय प्रोवाच –"एतेषां यथा बुद्धिविकासो भवति, तथा कोऽप्युपायोऽनुष्ठीयताम्" इति ।

**(४) तस्यामात्येषु एकस्याभिप्रायः कः ?**
राज्ञः एकः अमात्यः प्रोवाच – द्वादशभिर्वर्षैः व्याकरणशास्त्रं काव्यनाटकादीनि च, ततो धर्मशास्त्राणि मन्वादीनि, ततो अर्थशास्त्राणि चाणक्यादीनि, ततः कामशास्त्राणि वात्स्यायनादीनि च अध्येतव्यानि । कृते चैवं धर्मार्थकामशास्त्रेषु सुनिष्णातो भवेदिति ।

**(५) सुमतेरभिप्रायं विवृणुत ।**
सुमतेः अभिप्रायः – प्रभो ! अशास्वतोऽयं जीवितव्यविषयः । प्रभूतकालज्ञेयानि शास्त्राणि । तत् संक्षेपमात्रं सर्वशास्त्रसारं किंचिदेतेषां प्रबोधनार्थं विचिन्त्यतामिति ।

**(६) विष्णुशर्मणः प्रतिज्ञा का ?**
विष्णुशर्मणः प्रतिज्ञा – तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि ततः स्वनामत्यागं करोमि इति ।

**2. एकेन वाक्येन उत्तरं लिखत –**

**(१) महिलारोप्यनगरस्य राजा कः ?**
महिलारोप्यनगरस्य राजा अमरशक्तिः ।

**(२) कीदृशौ सुतौ वरम् ?**
मृताजातौ सुतौ वरम् ।

**(३) कः यावज्जीवं दहति ?**

जडः यावज्जीवं दहति ।

**(४) पञ्चतन्त्रं केन ग्रथितम् ?**
विष्णुशर्मणा पञ्चतन्त्रं ग्रथितम् ।

## 3. ससन्दर्भं विवृणुत –

**(१) छात्रसमूहे लब्धकीर्तिश्च ।**
कः पाठः ? पञ्चतन्त्रकथामुखम् इति पाठः ।
कः अवदत् ? सुमतिनामा सचिवः अवदत् ।
कं प्रति अवदत् ? राजानं प्रति अवदत् ।
कदा अवदत् ? सचिवः अमरशक्तेः पुत्रेभ्यः संक्षेपमात्रं सर्वशास्त्रसारं बोधयितुं विष्णुशर्मा नाम भूसुरः शक्तः इत्युक्त्वा तस्य विषये एवं वदति ।

**(२) प्रभूतधनेन योजयिष्यामि ।**
कः पाठः ? पञ्चतन्त्रकथामुखम् इति पाठः ।
कः अवदत् ? राजा अवदत् ।
कं प्रति अवदत् ? विष्णुशर्माणम् अवदत् ।
कदा अवदत् ? स्वपुत्रान् द्राक् अर्थेशास्त्रे अनन्यसदृशान् विदधातुं विष्णुशर्माणं संप्रार्थ्य एवम् अवदत् ।

**(३) न किञ्चिदर्थेन प्रयोजनम् ।**
कः पाठः ? पञ्चतन्त्रकथामुखम् इति पाठः ।
कः अवदत् ? विष्णुशर्मा अवदत् ।
कं प्रति अवदत् ? राजानं प्रति अवदत् ।
कदा अवदत् ? यदा राजा विष्णुशर्माणं प्रभूतधनेन योजयिष्यामि इति अकथयत् तदा विष्णुशर्मा तम् अशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य मम न किञ्चिदर्थेन प्रयोजनम् इति अवदत् ।

**(४) न पराभवमाप्नोति ।**
कः पाठः ? पञ्चतन्त्रकथामुखम् इति पाठः ।
कः अवदत् ? लेखकः अवदत् ।
कं प्रति अवदत् ? पाठकान् प्रति अवदत् ।
सन्दर्भः ? लेखकः पञ्चतन्त्रस्य महिमानं वर्णयन् यः प्रतिदिनं पञ्चतन्त्रस्य अध्ययनं करोति, शृणोति च, सः देवेन्द्रादपि पराजयं न प्राप्नोति इति वदति ।

## 4. प्रयोगं व्यत्यस्यत ।

(१) कोऽप्युपायोऽनुष्ठीयताम् । - कश्चन उपायम् अनुतिष्ठन्तु ।
(२) एकोऽमात्यः प्रोवाच । - एकेन अमात्येन प्रोचे ।
(३) नाहं विद्याविक्रयं करोमि । - न मया विद्याविक्रयः क्रियते ।
(४) श्रूयतां ममैष सिंहनादः । - शृणोतु मम एतं सिंहनादम् ।
(५) विष्णुशर्मणा पाठितास्ते राजपुत्राः । - विष्णुशर्मा पाठितवान् तान् राजपुत्रान् ।

## 5. कर्तृ – कर्म – क्रियापदानि निर्दिशत –

(१) राजा सचिवान् प्रोवाच ।
कर्तृ - राजा
कर्म - सचिवान्
क्रिया – प्रोवाच

(२) तस्मै समर्पयत्वेतान् ।

कर्तृ - भवान्
कर्म - एतान्
क्रिया - समर्पयतु
(३) पाठितास्ते राजपुत्राः ।
कर्तृ – (विष्णुशर्मणा)
कर्म - ते राजपुत्राः
क्रिया - पाठिताः

(४) भोः ज्ञातमेतत् भवद्भिः ।
कर्तृ - भवद्भिः
कर्म – एतत्
क्रिया - ज्ञातम्

## 6. विभज्य सन्धिनाम लिखत –

1. यन्ममैते – यत् + मम + एते – अनुनासिकसन्धिः, वृद्धिसन्धिः ।
2. कोऽप्युपायोऽनुष्ठीयताम् – कः + अपि + उपायः + अनुष्ठीयताम्  - विसर्गपूर्वरूपसन्धिः + यण् सन्धिः + विसर्गपूर्वरूपसन्धिः।
3. पुनरेतांस्तव – पुनः + एतान् + तव  - विसर्गसन्धिः (रेफादेशः) + सत्वसन्धिः ।

## 7. सुबन्ततिङन्ताव्ययानि सूचयत –

१. ततो राजा विष्णुशर्माणमाहूय प्रोवाच ।
सुबन्तं – राजा, विष्णुशर्माणम्
तिङन्तं – प्रोवाच
अव्ययम् - आहूय, ततः

२. न पराभवमाप्नोति शक्रादपि कदाचन ।
सुबन्तम् – पराभवम्, शक्रात्
तिङन्तम् – आप्नोति,
अव्ययम् – न, अपि, कदाचन

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. प्रकृतपाठे स्थितानां लिट्लकार – आत्मनेपदि - धातूनां रूपाणाम् अभ्यासं कुरुत ।

3. अस्मिन् पाठे स्थितानां लोट्लकार-परस्मैपदिधातूनां रूपाणाम् अभ्यासं कुरुत ।

4. अस्मिन् पाठे स्थितानां ल्यबन्ताव्ययानां चयनं कुरुत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१)वाचस्पतिः – बृहस्पतिः, सुराचार्यः, गीष्पतिः, धिषणः, गुरुः
बृहस्पतिस्सुराचार्यो गीष्पतिर्धिषणो गुरुः ॥
जीव आङ्गीरसो वाचस्पतिश्चित्रशिखण्डिजः । (अमरः)
२)वृत्तिः – जीविका, वार्ता, आजीवः, वर्तनम्
आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने । (अमरः)
३)मनोरथः - कामः, अभिलाषः, तर्षः

४)नूनम् – अवश्यम्

५)शक्रः – दिवस्पतिः, पाकशासनः, शचीपतिः, वासवः

इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः ।
वृद्धश्रवाश्शुनासीरः पुरुहूतः पुरन्दरः ॥
जिष्णुर्लेखर्षभश्शक्रः शतमन्युर्दिवस्पतिः ।
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ (अमरः)

६)सचिवः – मन्त्री, धीसचिवः, अमात्यः

मन्त्री धीसचिवोऽमात्यः ।(अमरः)

७)सुतः – आत्मजः, तनयः, सूनुः

आत्मजस्तनयस्सूनुस्सुतः पुत्रः ।(अमरः)

८)देशः – जनपदः, नीवृत्

**२. वाक्यदोषं परिहरत –**

१)नयशास्त्रकर्तॄणां नमोऽस्तु ।
नयशास्त्रकर्तृभ्यः नमोऽस्तु ।
२)जडः पुत्रः यावज्जीवं दहेताम् ।
जडः पुत्रः यावज्जीवं दहेत् ।
३)ततो राजा विष्णुशर्मम् आहूय प्रोवाच ।
ततो राजा विष्णुशर्माणम् आहूय प्रोवाच ।
४)न पराभवमाप्नोति शक्रायापि कदाचन ।
न पराभवमाप्नोति शक्रादपि कदाचन ।

**३. समूहेतरपदं चिनुत –**

१)मित्रभेदः, मित्रसम्प्राप्तिः, नीतिशास्त्रम्, अपरीक्षितकारकम्
२)बृहस्पतिः, चरकः, शुक्राचार्यः, पराशरः, चाणक्यः
३)बहुशक्तिः, उग्रशक्तिः, अनन्तशक्तिः, अल्पशक्तिः
४)प्रबुद्धान्, एतान्, भगवान्, अनन्यसदृशान्

**४. अन्यलिङ्गरूपं लिखत –**

१)पुत्राः – पुत्र्यः

२)एतान् – एनाः

३)उत्तमः – उत्तमा

४)तस्मै – तस्यै

**५. क्रियापदानां धातु – पद- लकार – पुरुष – वचनानि लिखत -**

| रूपम् | धातुः | पदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| दहेत् | दह् | परस्मैपदम् | विधिलिङ् | प्रथमः | एक० |
| अनुष्ठीयताम् | अनु + स्था | आत्मनेपदम् | लोट् | प्रथमः | एक० |
| करिष्यति | कृ | परस्मैपदम् | लृट् | प्रथमः | एक० |
| विदधासि | वि + धा | परस्मैपदम् | लट् | मध्यमः | एक० |
| ऊचे | ब्रू | आत्मनेपदम् | लिट् | प्रथमः | एक० |
| आजगाम | आ + गम् | परस्मैपदम् | लिट् | प्रथमः | एक० |

| | | | | | |
|---|---|---|---|---|---|
| आप्नोति | आप् | परस्मैपदम् | लट् | प्रथमः | एक० |

# १४.चित्रग्रीवकथा

## अभ्यासः

### 1. संस्कृतभाषया उत्तरं लिखत –

**(१) व्याधः कथमासीत् ?**
व्याधः कृष्णवर्णः, ऊर्ध्वकेशः, यमकिंकराकारः आसीत् ।

**(२) वायसेन किमनिष्टं दृष्टम् ? तत्परिणामं लिखत ।**
वायसः प्रभाते व्याधमपश्यत् । स व्याधः तण्डुलकणान् विकीर्य, जालं प्रसार्य अनतिदूरे प्रच्छन्नः स्थितः । कपोताः तेन जालेन बद्धाः ।

**(३) मानवेन नित्यं किमालोचनीयम् ?**
मानवेन नित्यम् उत्थाय मरणव्याधिशोकानाम् अद्य किं निपतिष्यति इति आलोचनीयम् ।

**(४) चित्रग्रीवः कः ? स स्वाश्रितान् कथं ररक्ष ?**
चित्रग्रीवः कपोतराजः । सः सपरिवारस्य रक्षणार्थं विपत्काले धैर्यमवलम्ब्य प्रतीकारम् अचिन्तयत् । कपोतराजः सर्वैरेकचित्तीभूय जालमादायोड्डीयताम् इति आज्ञाप्य, सर्वान् कपोतान् मूषिकस्य समीपं नीत्वा तान् बन्धनात् मोचयामास ।

**(५) षट् दोषाः के ?**
निद्रा, तन्द्रा, भयम्, क्रोधः, आलस्यम्, दीर्घसूत्रता च षट् दोषाः सन्ति ।

### 2. ससन्दर्भं विवृणुत –

**१. अद्य प्रातरेवानिष्टदर्शनं जातम् ।**
कः पाठः ? चित्रग्रीवकथा इति पाठः ।
कः अवदत् ? लघुपतनकनाम वायसः स्वमनसि अचिन्तयत् ।
कं प्रति अवदत् ? स्वमनसि अचिन्तयत् ।
कदा अवदत् ? यदा लघुपतनकनाम वायसः व्याधम् अपश्यत् तदा एवम् अचिन्तयत् ।

**२. सर्वथा अविचार्य कर्म न कर्तव्यम् ।**
कः पाठः ? चित्रग्रीवकथा इति पाठः ।
कः अवदत् ? कपोतराजः चित्रग्रीवः अवदत् ।
कं प्रति अवदत् ? स्वपरिवारं प्रति अवदत् ।
कदा अवदत् ? यदा निर्जने वने तण्डुलकणान् दृष्ट्वा कपोताः तद्भक्षणार्थं प्रवृत्ताः चित्रग्रीवः तदा कपोतान् एवं प्रत्याह ।

**३. मुखरस्तत्र हन्यते ।**
कः पाठः ? चित्रग्रीवकथा इति पाठः ।
कः अवदत् ? लेखकः अवदत् ।

कं प्रति अवदत् ? पाठकान् प्रति अवदत् ।
कदा अवदत् ? यदि कार्यं सिद्धं भवति तर्हि फलस्य सम्विभागं समं कुर्वन्ति, कार्यं विफलं चेत् नायकः एव निन्द्यते इति लेखकः वदति ।

**४. वशमेष्यन्ति मे तदा ।**
कः पाठः ? चित्रग्रीवकथा इति पाठः ।
कः अवदत् ? व्याधः स्वमनसि अचिन्तयत् ।
कं प्रति अवदत् ? व्याधः स्वमनसि अचिन्तयत् ।
कदा अवदत् ? एकीभूय जालेन सह उड्डीय गताः संहताः पक्षिणः यदा विवदिष्यन्ति तदा मे वशम् एष्यन्ति – इति व्याधः स्वमनसि अचिन्तयत् ।

**५. करतलगतमपि नश्यति ।**
कः पाठः ? चित्रग्रीवकथा इति पाठः ।
कः अवदत् ? व्याधः अवदत् ।
कदा अवदत् ? यदा जालमादाय कपोताः दृष्टेरगोचरतां गताः तदा स व्याधो विषण्णः निराशश्च भूत्वा इमं श्लोकमपठत् ।

## 3. एकवाक्येनोत्तरं लिखत –

**१. वायसस्य नाम किम् ?**
वायसस्य नाम लघुपतनक इति ।

**२. आपत्काले केषां वचनं ग्राह्यम् ?**
आपत्काले वृद्धानां वचनं ग्राह्यम् ।

**३. कार्यसाधिका का ?**
अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।

## 4. पर्यायपदं लिखत –

1. वायसः = काकः
2. किंकरः = सेवकः
3. व्याधः = निषादः
4. वियत् = आकाशः, गगनम्
5. विचक्षणः = बुद्धिमान्, पण्डितः

## 5. विरुद्धपदं लिखत –

1. हितः x अहितः
2. बन्धनम् x विमोचनम्
3. प्रबुद्धः x सुप्तः
4. भद्रम् x अभद्रम्

## 6. व्याकरण विशेषं लिखत –

1. वायसेन सह = वायसेन इत्यत्र 'सह' शब्देन सह यदा योगः भवति तदा तृतीयाविभक्तिः भवति । "सहयोगे तृतीया" ।

उदाहरणानि –

१. मया सह त्वं पाठशालां आगच्छतु ।

२. रामेण सह पाठं पठ ।

2. कपोतराजः = 'कपोतराजः' अत्र 'राजाहःसखिभ्यष्टच्' इति सूत्रेण समासान्तः टच्प्रत्ययः भवति । नकारान्तः राजन्-शब्दः तत्पुरुषसमासे अकारान्तः भवति ।

उदाहरणानि –

१. महान् राजा महाराजः

२. मृगाणां राजा मृगराजः

३.

# योग्यताविस्तारः

**मौखिकाभ्यासः**

1.अस्मिन् स्थितानां स्वर-व्यञ्जन-विसर्गसन्धीनां चयनं कुरुत ।

2. अस्मिन् पाठे स्थितानां लङ्लकार-क्रियापदानां चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

3. पाठे स्थितानाम् हलन्त - शब्दानां चयनं कृत्वा रूपाणाम् अभ्यासं कुरुत ।

4. पाठे स्थितानां कृत्प्रत्ययान्तशब्दानां चयनं कुरुत ।

**लेखनाभ्यासः**

**१. पर्यायपदानि लिखत –**

१) वियति – आकाशे, गगने, नाके, अम्बरे, नभसि

द्योद्दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥ (अमरः)

२) विसर्पन् – उड्डयनं कुर्वन्

३) लुब्धः – गृध्नुः, गर्धनः, अभिलाषुकः

४) संहतिः – ऐक्यम्

५) विषण्णः – खिन्नः

६) वायसः – काकः, करटः, अरिष्टः

काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ।
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥
चिरजीवी चैकदृष्टिर्मौकुलिः पिकवर्धनः । (अमरः)

६) भद्रम् – कल्याणम्, मङ्गलम्, कुशलम्

श्वःश्रेयसं शिवं भद्रं कुशलं क्षेममस्त्रियाम् ।
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥(अमरः)

७) यमः – कृतान्तः, शमनः, कालः, दण्दधरः

धर्मराजः पितृपतिः समवर्ती परेतराट् ॥

कृतान्तो यमुनभ्राता शमनो यमराड्यमः ।
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ॥(अमरः)

८) प्रतीकारः – वैरशुद्धिः, वैरनिर्यातनः
वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ।(अमरः)

९) तण्डुलम् – वेल्लम्, अमोघा, क्रिमिघ्नः
वेल्लममोघा चित्रतण्डुला ।
तण्डुलश्च क्रिमिघ्नश्च विडङ्गं पुन्नपुंसकम् ॥(अमरः)

१०) मित्रम् – सखी, सुहृद्
अथ मित्रं सखा सुहृत् ।(अमरः)

११) किङ्करः – प्रेष्यः, भृत्यः, दासः, गोप्यकः
भृत्ये दासेरदासेयदासगोप्यकचेटकाः ।
नियोज्यकिङ्करप्रेष्यभुजिष्यपरिचारकाः ॥(अमरः)

**२. सन्धिं विभज्य नाम लिखत –**

१)नानादिग्देशादागत्य = नानादिक् + देशात् + आगत्य (जश्त्वसन्धिः)
२)उत्थायोत्थाय = उत्थाय + उत्थाय (गुणसन्धिः)
३)महद्भयम् = महत् + भयम् (जश्त्वसन्धिः)
४)सुदीर्घकालेऽपि = सुदीर्घकाले + अपि (पूर्वरूपसन्धिः)
५)प्रत्याह = प्रति + आह (यण्सन्धिः)
६)पाशान्मुक्ताः = पाशात् + मुक्ताः (अनुनासिकसन्धिः)

**३. प्रत्ययस्य नान लिखत –**

१)अनुसरन् - शतृप्रत्ययः
२)बोद्धव्यम् – तव्यत् प्रत्ययः
३)विकीर्य – ल्यप्प्रत्ययः
४)चिन्तयित्वा – क्त्वाप्रत्ययः
५)संहतिः – क्तिन्प्रत्ययः

**४. प्रयोगपरिवर्तनं कुरुत –**

१)सः व्याधं अनुसृतवान् ।
तेन व्याधः अनुसृतः ।
२)कपोतराजः तण्डुलकणान् अवलोकयामास ।
कपोतराज्ञा तण्डुलकणाः अवलोकयाञ्चक्रे ।
३)लघुपतनकः मैत्रीं संपादितवान् ।
लघुपतनकेन मैत्री संपादिता ।

**५. क्रियापदानां धातु – पद- लकार – पुरुष – वचनानि लिखत -**

| **रूपम्** | **धातुः** | **पदम्** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|---|
| निपतिष्यति | नि + पत् | परस्मैपदम् | लृट् | प्रथमः | एक० |
| अवलोकयामास | अव + लोक् | परस्मैपदम् | लिट् | प्रथमः | एक० |
| प्रत्याह | प्रति + ब्रू | परस्मैपदम् | लिट् | प्रथमः | एक० |
| आरभन्त | आ + रभ् | आत्मनेपदम् | लङ् | प्रथमः | बहु० |

| | | | | | |
|---|---|---|---|---|---|
| निश्चिकाय | निस् + चि | परस्मैपदम् | लिट् | प्रथमः | एक० |
| उड्डीयताम् | उद् + डी | आत्मनेपदम् | लोट् | प्रथमः | एक० |

# व्याकरणविभागः

## १. विसर्गसन्धिः

**अभ्यासः**

1. **ಕೂಡಿಸಿರಿ – Join the Sandhi**

देवः + अयम् = देवोऽयम्
मृगः + असौ = मृगोऽसौ
कः + अहम् = कोऽहम्
एषः + अद्य = एषोऽद्य
सः + अपि = सोऽपि
बालः + नमति = बालोनमति
काकः + रौति = काकोरौति
पुनः + जातः = पुनर्जातः
अन्तः + जलम् = अन्तर्जलम्
कः + अत्र = कोऽत्र

2. **ಬಿಡಿಸಿರಿ – Split the Sandhi**

सोहम् = सः + अहम्
पुत्रोनमति = पुत्रः + नमति
रामोजयति = रामः + जयति
स्वरव्ययम् = स्वः + अव्ययम्
देवोऽपि = देवः + अपि
वृषभोऽयम् = वृषभः + अयम्
वृक्षोऽसौ = वृक्षः + असौ
नरोऽसौ = नरः + असौ
लोकोऽयम् = लोकः + अयम्
नृपोजयति = नृपः + जयति

## २. रेफ ಆಗುವ ನಿಯಮ

## Rule of visarga changing into रेफ

**अभ्यासः**

**ಬಿಡಿಸಿ ಬರೆಯಿರಿ – Split and write.**

गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभो महत् ।
नभसोऽपि महद्ब्रह्म ततोऽप्याशा गरीयसी ॥
गिरिः महान् गिरेः अब्धिः महान् अब्धेः नभः महत् ।
नभसः अपि महत् ब्रह्म ततः अपि आशा गरीयसी ॥
एतैर्जितः = एतैः + जितः
तैरुक्तम् = तैः + उक्तम्
मुनिरेषः = मुनिः + एषः
सर्वैरुक्तम् = सर्वैः + उक्तम्
मनुरसौ = मुनिः + असौ
स्थाणुरयम् = स्थाणुः + अयम्

## ३. लोप ಆಗುವ ನಿಯಮ

## Rule for visarga's disappearance लोप

**अभ्यासः**

1. ಬಿಡಿಸಿ ಬರೆಯಿರಿ – Split the Sandhi

लोका इमे = लोकाः + इमे
नृप इति = नृपः + इति
स नमति = सः + नमति
एष आगतः = एषः + आगतः
देवा इमे = देवाः + इमे

2. ಕೂಡಿಸಿ ಬರೆಯಿರಿ –

ताः + नमन्ति = ता नमन्ति
शरः + एषः = शर एषः
सः + एव = स एव
एषः + ऋषिः = एष ऋषिः
सः + इति = स इति
अश्वः + आगतः = अश्व आगतः
गोपः + इति = गोप इति
गजाः + धावन्ति = गजा धावन्ति
मृगाः + अत्र = मृगा अत्र
कः + इति = क इति

**४.सकार** ವಾಗುವ ನಿಯಮ

Rule of visarga changing into **सकार**

**अभ्यासः**

1. ಬಿಡಿಸಿ ಬರೆಯಿರಿ – Split the Sandhi

देवस्तत्र = देवः + तत्र
गिरिश्च = गिरिः + च
मुनिस्तथा = मुनिः + तथा
एतैस्सह = एतैः + सह
बालाश्छत्रम् = बालाः + छत्रम्
शिवष्षण्मुखम् = शिवः + षण्मुखम्

2. ಕೂಡಿಸಿ ಬರೆಯಿರಿ – Join the Sandhi

रामः + तथा = रामस्तथा
मृगाः + च = मृगाश्च
कविः + षट्पदम् = कविष्षट्पदम्
एताः + षट् = एताष्षट्
काः + तत्र = कास्तत्र
एताः + च = एताश्च

## व्यञ्जनसन्धिः

**अभ्यासः**-1

**1.** ಬಿಡಿಸಿ ಸಂಧಿಯ ಹೆಸರು ತಿಳಿಸಿರಿ – spilt and name the sandhi

मरुद्भ्याम् = मरुत् + भ्याम् (जश्त्वसन्धिः)
कश्चन = कः + चन, कस् + चन (श्चुत्वसन्धिः)
तन्न = तत् + न (श्चुत्वसन्धिः)
अज्झलौ = अच् + झलौ (जश्त्वसन्धिः)
तद्यथा = तत् + यथा (जश्त्वसन्धिः)
तांस्तथा = तान् + तथा (अनुस्वारसन्धिः)
कण्टकम् = कं + टकम् (परसवर्णसन्धिः)
अर्हन्निति = अर्हन् + इति (ङमुडागमसन्धिः)
वाङ्महिमा = वाक् + महिमा (परसवर्णसन्धिः)
षड्ढंसाः = षट् + हंसाः (पूर्वसवर्णसन्धिः